

गोब्राह्मणप्रतिपालक-

छत्रपति-


श्रीशिवाजिमहाराजचरितम्



लेखकः

हसूरकरोपाह्वः श्रीपादशास्त्री

(न्यायतीर्थः, वेदान्ततीर्थः, मीमांसातीर्थः, साहित्यसागरश्च)



एतच्च

इन्दूरनगरे

'मालवा स्टेशनरी अँड प्रिंटिंग वर्क्स' नाम्नि मुद्रणालये


तदध्यक्षेण प्रकाशकस्य कृते मुद्रापितम्

मूल्यम्-पादोनं रूप्यकद्वयम् (१।।।)

(प्रेषणव्ययः पृथक्)

Publisher—Shripad Vaman Hasurkar,
Imalibazar, No. 30 Indore city, C. I.

Printers—The [illegible] Stationery & Printing
Works, Ltd. Indore, C. I.



प्रस्तावना.

अयि भारतवासिन् ! मम प्रियपाठक ! इदं खलु तत्रभवतो निखिलभूमण्डलविख्यातस्य, परद्रव्यपरकान्तानिस्पृहस्य, सनातनधर्मरक्षणबद्धकङ्कणस्य, स्वमातृभूमिस्वातन्त्र्यपालनाध्वरदीक्षितस्य दुर्मदोन्मत्तयवनोद्विग्नानां गवां यथाऽऽर्तानुरागिणां शरणस्य, यवनराज्यधूमकेतोः, अपारशौर्याकरस्य, छत्र[illegible]दवीभूषणस्य, महाराष्ट्रभूमीसौभाग्यतिलकस्य, भोसलेकुल[illegible] , श्रीशिवराजस्य पावनं चरितरत्नादर्शभूतं परिनामूत भवता देशबान्धवानां पाणिषु हस्तकमलेषु निदधतो मे मानस[illegible] [illegible] धन्यः स कालो यत्र महाराष्ट्र[illegible] [illegible] शिवराजरूपेणावततार. महाभागा [illegible] [illegible]स्थान्याया मातुर्जिजाईदेव्या जनित्वा परमनिःस्पृहाणां [illegible]रामदासस्वामिनामनुमहपात्रमभूत्. दुःसहेन यवनाग्निना निर्दग्धरूपाणि महाराष्ट्रस्थानि क्षत्रियकुलकमलानि स्वप्रतापेन प्रकाशयत् येन परमबलाढ्योऽपि विजापुराधीशो लीलयैव पराजितः, कपटी दिल्लीश्वरः स्वबुद्धिवैभवेन विस्मापितः, सर्वानपि म्लेच्छानाक्रान्तसमग्रभारतवर्षान् यवनाधीशान्

न्विजित्य महाराष्ट्रभूः स्वातंत्र्यसौभाग्यालंकृता कृता, तस्य जनकस्येव महात्मनः शिवराजस्य प्रतापम् वर्णयितुं कथं मादृशो मानवः शक्नुयात् ? तथापि शिवराजस्य लोकोत्तरं चातुर्यं तथा मातृभक्तिं तथा दीनदयालुतां निरीक्ष्य विस्मितस्तदीयं चरितं वर्णयितुं संकल्पमकरवम्. संप्रति प्रायः सर्वेषामेव भारतवासिनां संकल्पा उत्पद्यन्ते विलीयन्ते नतु सफला भवति तथापि भगवता मदीयः संकल्पः सफलीकृत इति तं त्रैलोक्यनाथं नमस्कारैः संभाव्य गुणदोषविवेकचतुरान् पाठकान् गुणग्रहणाय विज्ञप्य विरमामि.

विदुषांवशंवदः
श्रीपादशास्त्री.



मुख्यविषयानुक्रमः





१ पूर्वप्रसंगः

1. १ महाराष्ट्रदेशपरिचयः
2. २ यवनानां दक्षिणापथे प्रवेशः
3. ३ बहामनीराज्यं तदीया विभागाः
4. ४ यवनानामधिशासने कृत्स्नस्य भारतस्य स्थितिः

(१)

अस्ति समस्ते भारतवर्षे विख्यातः, सर्वतः परमविस्तीर्णैः पर्वतखण्डपाषाणावलिसंकटितैरतिविशालघनवृक्षराजिसमाच्छादितैः क्रूरव्याघ्रादिपशुनिवासीभूतैः सह्याचलस्य पादैर्व्यावृतः, स्थाने स्थाने विराजमानैः स्वातंत्र्यनिधिरक्षकैरिव परकीययवनादिरिपुगणारक्षैः सकलसाधनसम्पन्नैर्नगरैरिव दुर्गैर्मनोहरः, चतुरङ्गबलसंस्कृतैर्नानाधान्यांकुरभूषितैः क्वचिद्धरितैः क्वचिद्रक्तैः क्वचित्पीतैः स्थलविभागैरतिसुन्दरः, स्वपावित्र्यनाशभिया यवनाक्रान्तादार्यावर्तात्समागतैरिव

विन्ध्याचलपश्चिमैर्नानागिरिसंघटैः पालितः, भागीरथीभगिन्येव वा रेवा चक्रांकयेव महापल्लगतया भागीरथ्येव वा परमपवित्रसलिल उभयकूलविराजमानधान्यांकुरमण्डितक्षेत्रजातनिर्विघ्नविचित्रया कृष्णा नद्या समलंकृतः, प्रतिपदविराजमानैरैतिहासप्रसिद्धैः स्थलैः प्राचीनैर् महाराष्ट्रनामा महान् देशो दक्षिणापथे.

यश्च—सकलेष्वपि भारतप्रदेशेषु यवनाक्रान्तेषु, सर्वेषु च भारतवासिषु दुर्मदयवनपीडितेषु, भगवत्या अनाथायाः कामधेन्वा इव स्वातंत्र्यदेव्याश्चिरं निर्भयनिवासस्थानतां प्राप.

यं च—सर्वधर्मोपकारक ऐहिकामुष्मिकसुखदायी सर्वत्र सर्वैरपि संमानितः, सनातनधर्मः प्रबलैर्यवनैराक्रान्तः स्वरक्षणार्थं सर्वत्र गत्वाऽकृतार्थः शरणीकृत्याऽऽत्मानं ररक्ष.

येन च—समाक्रान्तसकलभारतवर्षा पवित्रभारतमहिलापातिव्रत्यहारिणी देवालयध्वंसकारिणी सात्विकविप्रगणत्रासदायिनी यवनवात्या बलात्प्रतिबद्धा दक्षिणापथमार्यावर्तमिव नातिचक्राम.

यस्मैच —रोचते स्वकुलपावित्र्यं, स्वातंत्र्यं, सदाचारः, दीर्घोद्योगित्वं, कुशाग्रबुद्धित्वं, समाजसुधारणा, निरतिशयं शौर्यं च.

यस्माच्च—तानाजिमालुसरे,बाजीप्रभुदेशपांडे,प्रभृतयोऽपारशौर्या

विराजमानानि महाराष्ट्रदेशवर्तीनि अनार्यगम्यानि जेतुं मतिमकुर्वन्. महता साहसेन नर्मदां समुल्लंघ्य विंध्याचलमध्यगामिना मार्गेण महाराष्ट्रं प्रविश्य क्रमेण तत्रस्थानि राज्यानि स्वायत्तानि कुर्वाणास्ते आर्याः सकलमपि दक्षिणापथमाक्रम्यानार्यान् दासांश्चक्रुः. तेऽपि कालप्राप्तं दुर्दशां स्वीकृत्य तेषां दास्यं च प्रायो दक्षिणापथ एव स्थित्वा स्वजीवनमयापयन्.

एवं समग्रस्य भारतवर्षस्य स्वामित्वं लब्ध्वा ते आर्याः स्वराज्यव्यवस्थां कुर्वाणाः प्रथमतः स्वकर्माणि चतुर्धा व्यभजन्त. तानि च शिक्षणशासनवाणिज्यसेवाभेदेन भिन्नानि सकललोकशास्त्रप्रसिद्धान्येव. तदर्थं च ते स्वीयेभ्य एव कांश्चित्तैलप्रज्ञान् जनान् विशिष्य शिक्षार्थं न्ययुंजत. एवमेव तत्तत्कर्मयोग्यानन्यानपि. तेऽपि यथारुचि कर्म लब्ध्वा महता मोदेन तथोत्साहेन स्वकर्मणस्तादृशमुत्कर्षं चक्रुर्यथा सर्वेऽपि जगतीतलवासिनस्तदानींतनाः पुरुषाः परं व्यस्मयन्त. अद्यापि हि प्राचीना इतिहासविदस्तं विभज्यकर्मकारिणामार्याणामुत्कर्षं प्रतिपादयन्ति. विचारशीलास्तामेव समाजव्यवस्थां कामयन्ते.

एवंक्रमेण लौकिकसुखस्य परां काष्ठामारूढेषु सकलेष्वपि आर्येषु ते व्यवहारार्थं तथा कार्यस्य सौकर्यार्थं च कल्पिताश्चत्वारो विभागाः सकलोत्कर्षकारणं परस्परैक्यं विस्मृत्य प्रत्येकं भिन्नानमन्यन्त. यथा हि प्रथमं ब्राह्मणाः क्षत्रियादीनधस्तनान् वर्णान् कयाऽपि विपत्त्या पीडितानवलोक्य तत्साहाय्यं शीघ्रमकार्षुस्तथा तदीया वंशजा

सर्वस्येयं भारतभूः कपर्दिकामशेषाऽपि नाभयत्. अगणितान् जनानिहत्य तदीये रक्तैश्च सिक्त्वा न नयनयोः संतोषमकरोत्.

वाचकाः ! जीवत्सु बलाढ्येषु तेषु क्षत्रियराजेषु अकस्मादनाथस्येव भारतस्य लुण्ठनं यवनैः कृतमिति विचित्रं विस्मयकरमिवाभाति, तथापि ये खलु विचारशीला न ते विस्मयन्ते ! बलाढ्योऽपि महानपि तूलसंघः सूक्ष्मेणाऽपि दृढेन वातेन विधूयते न वा ! स्थाने स्थाने विदीर्णो नानाछिद्रान्वितो महानपि पर्वतः स्वल्पेनाऽपि निर्झरेणान्तः प्रविश्य चूर्णीक्रियते न वा ? तथैव बलाढ्याअपि क्षत्रिया अन्यैरुदासीनैः कश्चिच्च बद्धद्वेषैर्भारतवासिभिरकृतसहायाः संहतैर्यवनैः पराजिताः. न केवलं क्षत्रियाणामेवैषा दुर्गतिः किंतु सर्वेषामपि त्रैवर्णिकानां. बान्धवाः ? न खलु केवलमन्ये त्रैवर्णिका एव क्षत्रियानद्विषन् नासाहाय्ययन् किंतु क्षत्रियभूपाला अपि परस्परं बध्दद्वेषाः स्ववैरनिर्यातनार्थं यवनान् स्वसाहाय्यार्थमाह्वयन्. एवंस्थिते परस्परद्वेषभिन्नानां क्षत्रियाणां विजयः कथं स्यात् ? सज्जनाः ? यवनानां समये भारतवासिनः क्षत्रियभूपालाः कथं परस्परमद्विषन्निति दर्शयितुमहं कांश्चिद्वृत्तान्तानितिहासप्रमाणान् लिखामि.

यदा चायं महंमदघोरीनामा यवनराजो भारतमाचक्राम तदा दिल्लीनगरे क्षत्रियकुलावतंसः पृथ्वीराजो राज्यमकरोत्. तस्मिन्नेव समये गुर्जरदेशे भोळाभीमदेवनामाऽन्यः क्षत्रियश्रेष्ठ एव स्वराज्यं न्यायेन प्रशशास. स चाबूदुर्गे राज्यकारिणः परमारराजस्य इच्छिनीकुमारीं नाम कन्यां बलादेवायाचत. अबूनरपतिस्तु तां याचनां तिरस्कृत्य

यदा हि यवनानामितिहासं वाचकः पठति तदा रात्रिंदिवं ... तथा परजायायनचापहारार्थं ते कीदृशानि कर्माणि चक्रुरिति चित्ते कुर्वाणः स विस्मयसागरे निमज्जति. गुलाम,गिल्जी,तघलख,-मोंगलाभिधाना यवनवंशा यलोन्मत्ताः पूर्वं दुर्वृत्तमभवन्. यदा च खिल्जीकुलसंभवो जलालुद्दीननामा यवनाधिपो दिल्लीश्वरोऽभवत्तदा तस्य भ्रातुष्पुत्रोऽल्लाउद्दीनो योद्धुकाम आर्यावर्ते जेतव्याभावं पश्यन् दक्षिणापथे आर्यावर्तसमागतैः क्षत्रियैः स्थापितानि राज्यानि जेतुमाचकांक्ष. स तु महत्या त्वरया गुर्जरदेशं प्रविश्य तदधिपं कर्णरायं विजित्य तद्भार्यामात्मपत्नीं व्यधत्त. ततो देवगिरिं गत्वा तदधिपं रामरायं विजित्य स्वसामन्तमकरोत्. महाभागाः! अयमेव पराक्रमी अल्लाउद्दीन इत्थं दक्षिणापथविजययशो लब्ध्वा निवृत्तः स्वपितृव्यस्य दर्शनायागच्छत्. तत्र च महता प्रेम्णा सत्कृत्य कुशलमापृच्छन्तं तमेव पितृव्यं पूर्वं संकेतितैः शस्त्रोपजीविभिर्निहत्य स्वयं दिल्लीश्वरोऽभवत्. वाचकाः! पश्यत राज्यलालसायाः स्वरूपं. यो हि जलालुद्दीनः स्वभ्रातुष्पुत्रं विजयिनं सत्कर्तुमागतः स एव तेन निहतः! अस्तु. अयमेव दक्षिणापथविजयी प्रथमो यवन इति वाचकैरवधारणीयं.

यदा चायं प्रबलो यवनो दक्षिणापथं जेतुं समागच्छत्तदा दाक्षिणात्यानि समीचीनानि राज्यानि व्यराजन्, तानि केवलमैतिहासिकवृत्तज्ञानार्थमिह संक्षेपेण लिखामि. तदानीं महाराष्ट्रे यादवकुलसंभूता देवगिरिराजधानीका राजानो राज्यमकुर्वन्. तैलंगदेशे वरंगुलराजधान्यां नरपतिनामानो नृपा आसन्. द्राविडदेशे मदुराराजधानीका

यादवराजकुलसंभवा भूपाला भुवमपालयन्, तथैव वारंगलराजधानीकाः काकतीयवंशजा राजानो व्यराजन्. अन्ये च स्थाने स्थाने पराक्रमशालिनो भूपाला यथाशक्ति दक्षिणदेशमपालयन्, परन्तु अपरिमितैर्दिल्लीश्वरो यवनो यदा दक्षिणस्यां जैत्रयात्रायै यदा गतेन यवनेन भमा इतर इंदौरे मन्दिराणि भग्नानि धर्माद्युल्लंघनम्. तथापि गतवर्षेषु क्रमेण हंसेभगमनं कृत्स्नं दक्षिणापथं निर्जित्य यादववंशश्रेष्ठ एवं स्वधर्मसोपानमन्दिरं विघातयित्वा धनराशिभिः समं स्वराजधानीमाजगाम.

(२)

एवं क्रमेण कृत्स्नं दक्षिणापथं निर्जित्य दिल्लीन्द्रोऽलाउद्दीनो यदीया वंशजाः कतिपये दिल्लीश्वरा अभवन्. ततश्च परं खिलजीवंशसंभूतं दिल्लीपतिं निहत्य गयासुद्दीनतघलखनामा यवनो यदा दिल्लीश्वरो बभूव तदा दिल्लीनगरे गंगुनामा ब्राह्मण ज्योतिर्विद् न्यवसत्. तस्य संनिधौ हसननामा यवनदास आसीत्. एकदा स हलेन क्षेत्र कर्षन् भूमौ सुवर्णपरिपूर्णमेकं भाण्डं लेभे. तच्च भाण्डं स्वस्वामिने सर्वं वृत्तं निवेद्य समर्पयत्. स च तस्यास्तं तस्य प्रामाणिकतामवलोक्य सन्तुष्टमना दासत्वान्मोचयित्वा दिल्लीश्वरस्य सेवायां न्यवेशयत्. पाठकाः ! अयमेव प्रसिद्धस्य बहामनीसंज्ञकस्य दक्षिणापथीयवनराज्यस्य प्रथम संस्थापकः. अस्तु. शीघ्रमेवाय हसनो दिल्लीश्वरस्य कृपां संपाद्य दक्षिणापथे तेन नियुक्तः सन्

रोत्. अचिरादेव गुर्जरप्रान्ताध्यक्षो राजद्रोही नाम भूत्वा स्वतं भवितुमियेष. तं च दक्षिणापथनियुक्तो राजप्रतिनिधिरसाहाय्ययत्. तं तु गुर्जरप्रान्ताध्यक्षं शासितुं स्वयं दिल्लीश्वरो महता सैन्येन सम गुर्जरदेशमागत्य लब्धयशास्स्य साहाय्ययितारं दक्षिणापथाधि कारिणं शासितुं महाराष्ट्रमाययौ. अत्रान्तरे दिल्लीप्रान्ते किंचित्संक उद्बभूव. तस्य निवारणार्थं ते प्रदेशं जिगमिषुः स स्वद्रोहिणो दक्षिणा पथाधिपस्य शासनकर्मणि एनं हसननामानं यवनं नियुज्य 'जाफरखान' पदव्या समलंचकार. ततश्च स्वदेशं गते दिल्लीश्वरे शत्रुभिर्भूयिष्ठ्यास्यमानं च 'अल्लाउद्दीनहसन' नाम्ना विख्यापय कृत्स्नस्य दक्षिणापथस्य स्वामिनं व्यधात्. क्रमेण तैलंगणगोंडवनादि विभागाध्यक्षैः समं युद्धानि विधाय सकलमेव दक्षिणापथमनुशशास.

वाचकाः ! एवंविधया संस्थापितेऽस्मिन् बहामनीराज्ये बहवं यवनराजा अभवन. यदा चास्मिन् महति राज्ये ये खलु शासना राज्ञा नियुक्तास्तत्तद्विभागाध्यक्षास्त एव राजानं व्यसनासक्तं वीक्ष निर्भया अभवंस्तदा कृत्स्नमिदं राज्यमनश्यत्. नष्टस्यास्य महाराज्य स्य पंच विभागा अभवन् ते च नामतो यथा—

विजापुरस्थः—आदिलशाहीनामकः
गोवळकोंडस्थ —कुतुबशाहीनामकः
वऱ्हाडस्थः—इमादशाहीनामकः
अहमदनगरस्थः—निजामशाहीनामकः
महम्मदाबादस्थः—बेरीदशाहीनामकः

द्यतां नयन्ति न बलात्कारेण. बलात्कारात्तु जिताअपि जना दुर्मनायन्ते. प्रजाप्रसादमूलिका हि राजसत्तेति सर्वेषां मतं. एषैव राजनीतिः. सा तु यवनेषु अंशतोऽपि नासीत्. ते केवलं खड्गबलेनैव राज्यशासनमजानन्. तेन प्रतिवर्षं सहस्रशो राजद्रोहिणः प्रादुरभवन्. प्रजाजना अपि दुर्बलं स्वाधिपं वीक्ष्य तदीयप्रासादात्मानं मोचयितुं प्रायतन्त. ततो भारते स्वास्थ्यस्य नामापि नाश्रूयत.

किंच-यथा हि सकलो जनः स्वाभीष्टं धनादिकं मन्यते तथैव स्वकलत्रपुत्रादीन्. एवंस्थिते भारतं विजिगीषवः सुस्वरूपा महिला दासीः कर्तुं प्रयतमाना यवनाः सर्वानपि भारतवासिनोऽपारदुःखसागरनिमग्नानकार्षुः. न केवलं साधारणाः सैनिका यवना इत्थं चक्रुः, किंतु परदारापहारकर्मणि दिल्लीश्वराअपि निपुणा एवासन्. परेषां जायापहरणार्थं ते महान्ति युद्धानि व्यधुः. प्रसिद्धो दिल्लीश्वरोऽल्लाउद्दीनः चितोडदुर्गाधिपस्य महाराजलक्ष्मणसिंहस्य पितृव्यपत्नीं पद्मिनीं लावण्यवतीं निशम्य तां कामयमानो घोरं युद्धं विधाय स्वकीयान् सैनिकांस्तथा परानपि अगणितान् समरदावानले जुहाव. अन्ते तामपि महाभाग्यां सतीं पद्मिनीं वन्दी कर्तुमशक्नोत्. सज्जनाः! सर्वस्मिन्नसारे संसारे सारं कौटुम्बिकं सुखं. तत्र च गृहिण्येव सुखकारणं. तस्या एवापहारे निराशो मनुष्यः किं किं न कुर्यात्!

अपिच-यथाहि संसारे मानवा लौकिकं सुखं कामयन्ते तथैव मानमपि. यदि ते मानं न कामयेरंस्तदा लौकिकं सुखं प्रभूतं

पु क्षत्रियकुलेषु ब्राह्मणानपि गृहीतभिन्नभिन्नवेषा उपासनोपदेशद्वारा सर्वेभ्यो भारतस्थेभ्यो दुरवस्थां निवेदयामासुः. एवंरीत्या यवन-संतापितानां सर्वेषां भारतवासिनां स्वातंत्र्यलाभेच्छा कथं महाराष्ट्रे पल्लवयाम्भूदिति सर्वं क्रमेण निरूपयिष्यामः.





१ यवनानां भयाद्दक्षिणापथमागताः क्षत्रियशाखाः
२ राजस्थानक्षत्रियवृत्तम्.
३ भोसलेकुलोत्पन्नानां प्रधानपुरुषाणां संक्षेपेण वृत्तम्.
४ पितामहस्य मालोजिराजस्य सविस्तरं वर्णनम्.

[१]

पाठकाः ! निरूपितो मया यथामति पूर्वप्रसंगः. यद्यप्यधुना चरित्रनायकस्य वृत्तं निरूपयितुं योग्यं तथापि शिवनृपतेः कुलवृत्तज्ञानार्थमन्येषां दक्षिणापथवासिनां तत्सजातीयानां कुलवृत्तनिरूपणमावश्यकमिति तदेवादौ निरूपयामि.

यदाऽऽर्यावर्ते यवना बलिष्ठा भूयांसश्चाभवंस्तदा बहव आर्यवंशजाः क्षत्रिया नूतनानि राज्यानि स्थापयितुं दक्षिणापथमागच्छन्निति मया पूर्वमेव कथितं. तथैव दक्षिणापथे तैः स्थापितानि राज्यानि पुनरपि मदोन्मत्ता यवना अजयन्नित्यपि. तत्र दक्षिणापथे

भिन्नानां [illegible] नाशे न पर [illegible] येन
[illegible] कदापि तेषु तेषु यवनराज्येषु [illegible]
[illegible] यवनराजेभ्यः. [illegible]
[illegible]
[illegible]. अत्र च यदीना [illegible]
क्रमेण भिन्नेषु यवनराज्येषु [illegible]
ना-विस्मृतस्वस्वरूपा कुलसंस्कारा अनार्यै. कुलसंपन्ना: शूद्र
मन्यन्त.

किंच—यवनग्रामाशाः खलु दाक्षिणात्यं क्षत्रियशाखा: मन्
गच्छंस्ताअपि यवनैर्जिता: कालक्रमात् स्वालिन्यमार्गं
स्वशरीरसंबंधं पूर्वं प्रतिपिद्धैस्तार्थैः समं चतुर्गंत्यन्तराभावादेव
खलु अनार्येभ्यो यवनान् समीचीनान् कोऽपि मचेता मनुते.
स्पष्टतरे वृत्ते जागरूके सत्यपि न तदानीतनैर्विप्रवर्गैः पुन
संस्कृत्य क्षात्रियतां लंभयित्वा स्वकर्मानुष्ठानुं न प्रोत्साहिता,
महच्छोकास्पदं ? वाचका ! शौर्यप्रधाना क्षत्रियजातिर्वृष्ण
नास्तीति कथ्यते तदाऽस्मासु शौर्यमेव नास्तीति कथितं स्
तथासति नपुंसकानां न: को वा जगति मान: ? वीरभोग्या वसुंध
प्रत्युत यदा शिवराजचन्द्रमाः समुल्लास तदा बहवः खलु य
धर्मानुसारिणस्त्यक्तसनातनधर्माणः स्वसजातीयाः पुनरपि संस्
संस्कृत्य स्वधर्मानुसारिणः कृताः. यथा निम्बाळकरोपनामा क
क्षत्रियश्रेष्ठो विजापुराधीशस्य कन्यां परिणीय महंमदीयधर्म

प्रमुदितास्ते सर्वेऽपि स्वाभिमानशालिनस्तस्य साहाय्यार्थमागच्छन्। सोऽपि तान् शूरान् संगृह्य तत्रैकस्य कन्यां शिवराजः स्वस्नुषामकरोत्. स्वयमपि तद्वंशसंभूतां कन्यां पर्णयत्. स्वकन्यामपि तत्कुलोत्पन्नाय गणाजिरावनाम्ने शूराय ददौ. एतेषामीदृशोपनामलाभे तन्निवासग्रामे 'शिरकाई' देव्या अस्तित्वमेव कारणं.

२ घाटगेवंशजा बहामनीराज्ये लब्धप्रतिष्ठा नूतनाभिः स्वप्रतापार्जिताभिः 'प्रतापरावझुंझारराव'प्रभृतीभिः सन्मानबोधिकाभि. पदवीभिः समलंकृताः सुसंपन्ना आसन्.

३ घोरपडेवंशजा. 'सांडूरकर,मुधोळकर, दत्तवाडकर, गुत्तीकर, 'इत्यादिनामभेदेन भिन्ना बहव एव. तेषां च प्राथमिकं नाम भोसले इत्येव. परन्तु कश्चन प्रतापी एतद्वंशजः पुरुषो यवनाधीशं सेवमानस्तदर्थ घोरपडीनाम्ना दुर्गारोहणयंत्रेण किमपि दुर्गं समारुह्य जिगाय. तेन च तादृशं तस्य नाम बभूव. इमेऽपि शिवराजस्य सहाया एव.

४ मोहितेकुलसंभूताः पुरुषाः पराक्रमशालिनोऽभवन्. तत्र शिवराजस्य मुख्यः सेनापतिर्हंबीररावनामा मोहितेकुलसंभूत एव. तथा शिवराजस्य सापत्नमाताऽपि.

५ महाडिकवंशजाअपि नरवीराः परमशूराः प्रथमतः स्वतंत्रा एव, तथापि मोरेकुलसंभवैः पुरुषैर्जिताः श्रीशिवराजमाश्रित्य देशोद्धारं चक्रुः. एतत्कुलसंभूताय हरजीराजाय श्रीशिवराजः स्वकन्यामदात्.

६ मोरेवंशधराअपि पुरुषा अंशतः स्वतंत्राः सर्वं कोंकणविभागमपालयन्.

७ सावन्तान्वयसंभूता नरा विजापुराधीशानुग्रहेण परं वैभवं समपादयन्.

८ निंबाळकरकुलजाअपि पराक्रमशालिन आसन्. अद्यापि ते स्वराज्यं भुंजते. एते तु परमारनामकसुप्रसिद्धक्षत्रियकुलसंभूता इति प्राचीनेतिहासविदो वदन्ति. एतद्वंशसंजातो जगपाळरावनामा क्षत्रियश्रेष्ठः स्वतंत्र एवासीत्. अस्मच्चरित्रनायकस्य पितामही जगपाळरावस्य भगिनी. अस्मिन् वंशे संजाता मुधोजीरावस्य कन्या शिवराजस्य ज्येष्ठपत्नी.

९ इदं जाधवकुलं प्रसिद्धाद्यादवकुलात्संभूतं तच्छाखाभूतमेव. अस्मिंश्च सुप्रसिद्धो देवगिरिनाथो रामदेवरावोऽभूत्. अतएव जाधवशब्दोऽपि यादवशब्दस्यापभ्रंश एव. यदा च महंमदीयैर्दक्षिणापथो

जितसत्त्वा निभृतं ते खानदेशनामके दक्षिणापथविभाग एवातिष्ठन्. ततश्च क्रमेणेतरक्षत्रियवद्भिरपि निजामशाहीराज्ये लब्धप्रतिष्ठा नानापराक्रमाकृत्यान्यकार्षुः. वाचकाः! संक्षेपतः केवलं स्वरूपप्रदर्शनार्थं मयेमाः शाखा निरूपिताः. अन्या अपि बहुशः शाखा देशभेदेन कालभेदेन च विपरीतकुलाभिधाना विपत्या स्वीकृतनीचव्यवसायाः सर्वत्रैव महाराष्ट्रदेशे न्यवसन्निति सूक्ष्मदर्शिनामितिहासविदां मतं. ताश्च शिवराजसमये लब्धावसराः शौर्येण यवनांस्तिरश्चक्रुः.

(२)

वाचकाः? यथा काश्चन क्षत्रियशाखा दक्षिणापथमागतास्तथैव काश्चन मेवाडनाम्नि भारतस्य मध्यप्रदेशेऽन्यवसन्. सोऽपि प्रदेशो विस्तीर्णपर्वतगणपरिवेष्टित एव. यथैव दक्षिणापथे सह्याचलमाश्रित्योपदर्शिताभिः क्षत्रियशाखाभिः स्वरक्षणं कृतं, तथैव राजस्थानवासिभिः क्षत्रियकुलैररवलीप्रभृतीन् पर्वतान्. दिल्लीश्वराख्यो यवनराजाः समप्रदेशे आर्यान् जेतुं शक्ता अपि दुर्गमे दुर्गाढ्ये पर्वतसंकुलदेशे न ते आर्यान् जेतुमशक्नुवन्. तेन प्रायः सर्वोऽपि क्षत्रियवर्गो यवनत्रासभिया दुर्गमारण्यसंकुल एव स्थाने न्यवसत्. अस्तु सम्प्रति राजस्थाने दृश्यमानानि सर्वाण्यपि क्षत्रियकुलानि सुप्रसिद्धयो रामायणमहाभारतगीतयोः सूर्यचन्द्रवंशयोरिव शाखाभूतानि. तदुभयकुलसंभूता बहवो वीराः स्थाने स्थाने भूतलानि राज्यानि स्थापयामासुः. अधुना च प्राधान्येन राजस्थाने चत्वारि

मार्गमनुसर्तुमक्षमा तत्रैव निभृतं वसन्ती सुलक्षणं पुत्रं सुषु-
वे. तं च पुत्रं विप्रसात्कृत्य स्वर्गं जगाम. स च बालको
ब्राह्मणसंभूततया गुहदत्ति जनैर्व्यपदिश्यमानो लब्धतारुण्यो वनेचरैः
स्वाधिपत्येन स्वीकृतो नूतनं राज्यं स्थापयामास. तस्य कुले प-
ञ्च राजानः समभवन्. सप्तमे महादित्ये राजनि केनापि निमित्तेन
संघीभूय समुत्थिता वनेचरास्तं स्वाधिपमघ्नन्. तस्य पत्नी गर्भिणी
बाप्पारावळनामानं पुत्रं प्रासूत. बाप्पारावळश्च बाल्ये विप्र-
पालितोऽपि यौवने चित्रोडाधिपस्य सेवको भूत्वा महान्ति पराक्र-
मकर्माण्यकरोत्. अन्ते च बाप्पारावळाय स्वकीयं राज्यं समर्प्य
चित्रोडाधिपः स्वदेहमाकल्पं स्थातुं वनमगात्. तद्दिनमारभ्यास्य
वंशश्चित्रोडनगरे विराजमानोऽद्यापि वर्तते. एतत्कुलसंभूतः कश्चन
राजा सेवकदोषेण यौवनस्थ आत्मानं पापिनं मन्यमानस्तस्य पापस्य
निष्कृत्यै शिशोदकं निर्णीय प्राणानत्याक्षीत्. ततःप्रभृति कुलस्य नाम
'शिशोदिया' इति राजस्थानीयाः प्रार्थनानिरताभिधां वदन्ति. अनु
तत्र स्वातंत्र्येण स्वराज्यं पालयत्स्वप्रसु राजसु समरसिंहनामनि
दिल्लीश्वरं भूयोभूयोऽजयत्. तथापि स दिल्लीश्वरं नाजयत्. अथ
लक्ष्मणसिंहे चित्रोडाधिपे सति अयं पठाणकुलोद्भवः प्रसिद्धे
दिल्लीश्वरोऽल्लाउद्दीननामा चित्रोडराज्ञी पद्मिनीनाम्नी लक्ष्मणसिंहस्य कन्यां
वा कामयमानः प्रायुध्यत. राजा लक्ष्मणसिंहेन पराजितोऽपि भूमि-
निमित्तं भूयोभूयः प्रावर्तत. लक्ष्मणसिंहश्च तत्प्रतिनिवेश वर्ष

यसजातीयानां निष्कारणां हानिं च वीक्ष्य दुःसहतुलोऽस्य युद्धस्यान्तं चेकीर्षुः सर्वा अपि भार्या अग्निसात्कृत्य कुंकुमरसधारिभिर्गलितैः क्षत्रियवीरैः समं यवनसेनामाचक्राम. यथाशक्ति च तां न्यूनीकृत्य स्वर्गमारुरोह.

संग्रामभूमिगमनात् पूर्वं महाराणालक्ष्मणसिंहः स्वस्य वंशक्षयो नाभूदिति मन्वानः स्वकीयमतिप्रियं पुत्रमजयसिंहं निभृतमन्यत्र गन्तुमाज्ञापयामास. स च स्वेन समं स्वज्येष्ठबन्धोः पुत्रं बालं हम्मीरसिंहं गृहीत्वाऽगच्छत्. ततश्च क्रमेण स्वीयं राज्यं यवनेभ्यो विजित्य तत्र तं हम्मीरसिंहं प्रतिष्ठाप्य स्वयं मन्त्री बभूव. अथ महाभागेऽजयसिंहे दिवंगते तस्य पुत्रे सज्जनसिंहः मच्छीलः स्वपितृव्यपुत्रेण राज्यार्थं कलहं परिजिहीर्षुः स्वतंत्रराज्यस्थापनेच्छया दक्षिणापथमाययौ. स तु सोधवाडानामकं स्वल्पं दक्षिणापथविभागं निर्जित्य तत्र स्वतंत्रमेव राज्यं स्थापयामास. अस्य परमपवित्रे वंशे महाराजदिलीपसिंह, महाराजसिंह, महाराजभोसाजी, महाराजदेवराज,प्रभृतयः पुरुषश्रेष्ठा अजायन्त. एते सर्वेऽपि क्रमेण यवनैः समं चिरं प्रयुध्य स्वराज्यमरक्षन्.

(३)

यदा खलु देवराजमहाराजो राज्यमकरोत्तदा सर्वत्र प्रबलीभवन्तो यवनास्तं भूयोभूयोऽपीडयन्. प्रबलं मेवाडाधिपतिं विजेतु-

[illegible] देवराजमहाराजमेव [illegible] प्रायात्. यदा च देवराजमहाराजो यवनेभ्यो [illegible] [illegible] कोटविनुगनिजन् [illegible] श्रीमत्कृष्णानन्दोपेत [illegible] देशमार्ग [illegible]. तस्मिन् देवराजमहाराजे यदा [illegible] नाम परिवर्तयामास. स च महारा [illegible] [illegible] [illegible]

[illegible]

(५)

[illegible]

महता प्रेम्णा तं स्वसमीपे स्थापयामास. सोऽपि महाभागः शाही
राज्ञो महता विनयेन तस्य समीपं गत्वोपविवेश. सं च स्वपितु-
समीपे स्थितं स्वपात्रमित्रमालोक्य जिजाईदेवी नामकन्या पितु-
रङ्कमारोह. तौ च समानवयस्कौ सुन्दरौ बालौ वीक्ष्य जाधवराव
सहासं लीलया जिजाईमिदमुवाच—वत्से ! वाञ्छसि त्वमिमं पति-
मिति. अनन्तरमेव तौ बालकौ भाविना शुभेन चोदितौ महापूर्व-
पुण्यसंचयेन प्रेरितौ वा परस्परमङ्गयोः सुगन्धि द्रव्यमक्षिपताम्.
मीलिताः सदस्या अपि तयोरिमामनुरूपां क्रीडामवलोक्य विस्मिताः
'सर्वथा योग्याविमौ दम्पती' इत्यवोचन्. तदानीमेव मालोजिराजः
समुत्थाय जगाद—सभ्याः ! जाधवरावाः खलु अद्यप्रभृति नः संब-
न्धिनः संवृत्ताः. तेषां वाक्यं भवद्भिः श्रुतमेव. महान्तः सकृदुक्तं
शब्दमन्यथा न परिवर्तयन्ति इति. सकलाः सभ्या अपि सत्यमेवेदमिति
बभाषिरे. ततश्च द्वितीये दिने भोजनार्थमाहूतोऽपि मालोजिराजः
विवाहसमय एव युष्माभिः सह भोजनं भविष्यतीति दूतद्वारा निवेद्य
भोजनार्थं नाजगाम.

तदिदं वृत्तं जाधवरावस्य पत्नी म्हाळसादेवी श्रुत्वा नितान्तम-
कुप्यत्. मा तथा स्वपतिमस्मिन्विषयेऽदूषयदेन जाधवरावः 'केवलं
सभायामहं तथा विनोदेनावदम्. न तथाऽस्ति ममाशयः' इत्युक्त्वा
तां सान्त्वयामास. न्यवेदयच्च तथैव मालोजिराजाय. तथापि मालो-

राज्ञे यद्वाग्महं वीक्ष्य क्रुद्धः स जाधवरावस्तं सबन्धुं स्वसेवातो
एवासयत्.

अनया रीत्या मालोजिराजः सर्वां प्रतिष्ठां गमयित्वा पुनरपि-
पीवलः संवृत्तः. वाचकाः ? पश्यत धनस्य माहात्म्यं. मानिन
यकुलोत्पन्नस्यापि शूरस्य मालोजिराजस्य धनाभावेनैवानपमानः ?
ऽनात्र संसारे हि धनमेव सकलप्रतिष्ठाकारणमिति निर्णीतमेव.
यपि केचन विद्यया लब्धसन्माना दृश्यन्ते तथापि अपवादा एव
. अतो येन केनाऽपि विद्याभिलाषिणा धनमूलको मानो हेयएव.
। हि धनमूलकं मानमभ्यर्थयेत तेन सर्वथा धनसंपादन एव प्रयत्नः
रणीय इति तत्त्वम्. अस्तु. एवं मानधनः स मालोजिराजो
ाधवरावादपमानं लब्ध्वा दुःखाकुलो धनाभावमूलकोऽयमपमान
ति दृढं निश्चित्य धनसंपादनार्थं प्रायतत.

एकदा पूर्णचन्द्रचन्द्रिकाधवलितसकलमहीमण्डले पूर्णिमादिने
ालोजिराजः समं स्वबन्धुना क्षेत्रं पालयन्नवस्थितो मध्यरात्रे पुर-
स्ताद्वर्तमानाद्वल्मीकाद्विर्गतं सुवर्णरत्नकंकणमण्डितं करमवलोक्य
विस्मितस्तद्वृत्तं स्वबन्धवे न्यवेदयत्. स तु तं सर्वं केवलं भासं
दंस्तूष्णीमतिष्ठत्. तदनु सुप्ते मालोजिराजे स्वप्ने साक्षाज्जगदम्बा
शुभ्रवस्त्रपरिधाना स्मेरमुखी तं स्पष्टमवदत्–वत्स ? ".

ोकर्तव्य इति. तां च वार्तामुपासनामंदिराध्यक्षाः स्वाधिपाय
वेदयन्. तां निशम्य निजामशाहीश्वरो यवनोऽत्यन्तं चुकोप. स
वरमेव तं जाधवरावं समाहूय परं निरभर्त्सयत्. अवदच्च–यूयं
मायां तथोक्त्वा पुनरपि स्वांबुद्धिमाश्रित्य निवर्तध्वे ? एतदर्थमेव
लोजिराजेनास्माकमुपासनामंदिराणि दूषितानि. तदिमं कृपाकल्हं
हाय तस्य पुत्राय कन्यां दत्तेति. जाधवरावस्तु स्वस्वामिन इदं
वनं निशम्य मूढमतिरपि धैर्यमवलंब्य 'अयं मालोजिः केवलं
नादिनाऽस्माकं सदृशो नेति तथाकर्तुं विचारयाम' इति जगाद.
वनाधिपोऽपि तदानीमेव मालोजिराजमाहूय द्वादशसहस्रमादिना-
ाधिपत्यं, तथा चाकणशिवनेरीदुर्गे, पुणेसुपेप्रान्तविभागौ तस्मै
र्णीय राजपदव्या तमभूषयत्.

वस्तुतस्तु यवनोपासनामंदिरदूषणं नाम मालोजिराजस्यैवापराधः.
न स एव दण्डार्हस्तथापि तस्मिन् समये दिल्लीश्वरो दाक्षिणापथस्था-
ो यवनराज्यानि नाशयितुमुद्यतः, तत्प्रतीकारार्थं च दक्षिणापथस्था
वनाधिपा महाराष्ट्रस्थान् क्षत्रियान् स्वानुकूलान्विधातुं प्रायतन्त.
तस्मादेव कारणात् मालोजिराजस्तेन यवनाधिपेन न दण्डितः.
ातश्च मालोजिराजं सर्वथा स्वानुरूपमवलोक्य जाधवरावोऽप्यात्या
स्वकन्यां मालोजिराजस्य पुत्राय शहाजिराजाय वितताार. बाधकाः.

पिताहोल्मखम्नु स्वर्गं गच्छताभिर्निवासितेन इति लोकोक्तर एव यत्न
मालोजिराजोऽपि स्वयोग्यतानुरूपं धनाढ्यं विधाय मर्त्यलोकम्

एवं स्वपराक्रमैकत्वर्षं लब्ध्वा राज्यकर्मणि परां योग्यतां दर्शयन्तो भूयोभूयोऽधिकमेव सन्मानं प्राप्य मालोजिराजा स्वार्जित भूविभागस्योपभोगं पंचदशवर्षपर्यन्तं गृहीत्वा दिवं जग्मुः. शहाजि राजश्च तत्स्थानं लेभे.



राज्यानि आक्रमितुं प्रेषयामास. स तु प्रथमं निजामशाहीराज्यमेव चक्राम. मंत्री मलिकंबरः प्रथमतो महता धैर्येण तत्प्रतीकारमारभ परन्तु शीघ्रमेव पराजितः पलायनेनात्मानं ररक्ष. प्रधानमंत्रि मलिकंबरं पराजितमवलोक्याऽपि अत्यक्तधैर्यः श्रीशहाजिराजो महत साहसेन भूयोभूयो निभृताक्रमणैर्मोंगलसैन्यं जर्जरमकरोत्. तदा मोंगलसेनापतिः शहाजहानो मनस्यचिन्तयत्. यावदिमे क्षत्रिया इ निजामशाहीराज्यं रक्षन्ति तावदिदमजय्यमेव. तदिमे कयाऽपि युक्त भेदनीया इति. विचिन्त्य चैवं निजामशाहीराज्यस्याधारभूतान् सहा कान् क्रमेण धनादिना वा मानादिनाऽभेदयत्. तेषु च शहाजिरा एव स्वामिद्रोहमकृत्वा सर्वं धनमानादिकं निराकृत्य स्वामिपक्ष ए तिष्ठत्. तदीयः श्वशुरो जाधवरावस्तथाऽन्ये प्रमुखाः सामन्ता लोक कुलाः स्वामिद्रोहं विधाय शत्रुपक्षमवालम्बन्त. अन्येऽपि साधार दिल्लीश्वरस्य सामर्थ्यमवेक्ष्य भीतास्तदनुकूला अभवन्. प्रधानमं मलिकंबर एवं स्वकीयानां द्रोहमालोच्य दुःखाकुलः कथमपि दि श्वरेण संधिं विधायात्मानममोचयत्. जगाम च स्वर्गं लोकं.

दिवंगते मलिकंबरे पुनरपि संधिं विहाय दिल्लीपतिर्जाधवरा साहाय्येन युद्धं प्रावर्तयत्. अस्मिन् समये बालं निजामशाही रक्षितुं शहाजिराजादन्यः कोऽपि नासीत्. वाचकाः ? पश्यत इ वस्य प्रभावं. यो हि निजामशाहीराज्येश्वरः प्रभूतसामन्तमण्ड न्दिव आत्मानं शक्रादपि श्रेष्ठममन्यत, तदंशजमेव बालं प्राणा

लेभृवमरण्यादरण्यान्तरे पर्यटन्तमालोक्य कस्य मनो न दुःखायेत. केवलं शहाजिराज एवैकाकी तं बालं तथा तदीयां मातरं रक्षन् कथमपि अवर्तत. अत्रान्तरेऽकस्माद्दिल्लीश्वरो जहांगीरः परलोकमगात्. तेन तदीयः पुत्रः शहाजहानः सिंहासनाधिरोहणाय दिल्लीनगरमगच्छत्. समस्मिन्समये च स जाधवरावं महता सैन्येन समन्वितं विधाय निजामशाहीराज्याक्रमणार्थमयोजयत्. प्रकृतिचतुरः शहाजिराजः स्वल्पमवसरं लब्ध्वा तं स्वस्वामिनं मात्रा समं माहुलीदुर्गेऽस्थापयत्. जाधवरावश्च निजामशाहीश्वरं तस्मिन् दुर्गे निवसन्तमाकर्ण्य तद्दुर्गं प्रतिरुरोध. प्रतिदिनं क्रमेण तं दुर्गरोधं दृढं चक्रे. श्रीशहाजिराजस्तु क्रमेण वर्धमानं शत्रोर्वेष्टनमवेक्ष्यापि अनिराशो धैर्यमवलंब्य शत्रोराक्रमणानि विफलीकर्तुं प्रायतत, परन्तु यदाप्रभृति राजमातरं चपलमतिना गजेन्द्रेण जाधवरावेण बद्धस्नेहामपश्यत्तदारभ्य खिन्नः कथमपि आत्मानं ततो मोचयितुं मनश्चक्रे. शीघ्रमेव घनान्धकारप्रावृतसकलदिग्भागे मध्यरात्रे तं बालं पुत्रं गृहीत्वा तस्माद्दुर्गादवतीर्य शत्रुसैन्यभेदं विधाय शिवाङ्करस्य स्वमातुलस्य प्रदेशमालक्ष्य जवेनाधावत्. तदानीं माता जिजाम्बी गर्भवत्यपि स्वपतिना समुत्साहिता दधाव. अचिरादेव लब्धवृत्तः स जाधवराव आश्विकदलेन समं तमनुससार, परन्तु भाग्यशाली शहाजिराजः शीघ्रमेव स्वामिना समं स्वमातुलस्य प्रदेशमाययौ. तं च मातुलस्य

प्रवेशमागतमालोक्य स्वनाशभीत्या जाधवरावस्तद्दुर्गेयं त्यक्त्वा
पुनरपि माहुलीदुर्गस्य समीपे स्थितं स्वस्कंधावारमाजगाम.

इतश्च निजामशाहीराज्येऽधिकारपरिवृत्तिरभूत्. अन्य ए
कश्चन निजामशाहीराज्येश्वरो नाम भूत्वा दिल्लीश्वरं पराजया
तेन लोभाकुलो जाधवरावः पुनरपि दिल्लीश्वरपक्षं त्यक्त्वा निजाम
शाहीराज्यं सेवितुमाययौ. स तु कपटमतिर्जाधवरावं सपुत्रमनुग्र
तुमिच्छन्निव सभामाहूय शस्त्रिकैः पूर्वं संकेतितैरघातयत्. शहाजि
राजस्तु स्वश्वशुरस्य तथा स्वश्यालस्य च राजसभायां वधमाक
दुःखाकुलो मनस्यकरोत्–इमे यवना महापापाः कृतघ्नाः सर्पा इ
कदा केन विधिनाऽश्रितानां प्राणानपहरिष्यन्तीति ब्रह्माऽपि न जानाति
वयं च शूराअपि ऐक्यहीना उदरभरणार्थमिमानाश्रित्यैवमकाले यम
भूत्वा परलोकं व्रजामः. तस्मात् स्वतंत्रमेव राज्यमधुना स्थापनी
मिति. मत्वा चैवं प्रयतमानः क्रमेण प्रबलीभवन्तं दिल्लीश्वरं विलोक्य
स्वतंत्रराज्यस्थापनोद्योगादुपरतः पुनरपि निजामशाहीराज्यरक्षणा
कृतनिश्चयः सत्वरं विजापुराधीशमास्मिन् कर्मणि साहाय्यविधाना
विज्ञापयामास. स च प्रबलाद्दिल्लीश्वराद्बिभ्यन्निजामशाहीराज्यरक्ष
साहाय्ययितुं प्रतिजज्ञे. शहाजिराजश्च तस्मिन्नेव क्षणे तदीयसेनां त
स्वकीयमशेषं सैन्यं गृहीत्वा तं कृत्रिमं निजामशाहीराज्याधीश्वरं प
जित्य म्हसीतं बालमष्टवर्षं निजामशाहीराज्यसिंहासनेऽस्थापयत्

दिल्लीश्वरं शरणं गत्वा कृपामयाचत. दिल्लीश्वरोऽपि क्षमां विश्व-
स्तमधिमं शहाजिराजस्य नाशार्थमाज्ञापयत्. यदि च शहाजिराज
संतोषेण सर्वाणि दुर्गाणि तथा भूविभागान् मोक्ष्यति तदा न दण्ड-
नीय इत्यपि विख्यापयामास. ततश्च दिल्लीश्वरः सर्वेण सैन्येन स
शहाजिराजं विजेतुमन्वधावत्. शहाजिराजोऽपि धैर्यमवलंब्य यथा-
शक्ति दुर्गानुरोधेनायुध्यत, परन्तु मोगलसेनासागरस्य पुरस्तादचि-
रमेव निरुद्धवीर्यो बभूव. ततो महता दुःखेन स्वकीयानि सर्वाणि
दुर्गाणि तथा भूविभागान्दिल्लीश्वराय समर्प्य स्वयं विजापुराधीशं
सेवितुं विजापुरनगरमगात्. विजापुराधीशस्तु तं गुणिनं स्वामिभक्त
शहाजिराजं सत्कृत्य पुनरपि तस्मै महादुर्गमण्डितान् भूविभागान्
ददौ. शहाजिराजोऽपि लब्धसत्कारो विजापुराधीशं सपरिश्रमं सिंहे-
प्रबलजननिवासे कर्णाटकप्रदेशे तस्य विजापुराधीशस्य स्वामित्वं स्थाप-
यितुं चिरमयुध्यत. महता चातुर्येण सर्वमपि कर्णाटकविभागं स्वाय-
त्तीकृत्य विजापुरराज्यमर्यादामवर्धयत्. महता प्रदेशेन प्रवृद्धं स्वीयं
राज्यं विलोक्य सन्तुष्टो विजापुराधीशस्तं सर्वं प्रदेशं तस्मै एव ददौ.
शहाजिराजोऽपि तस्मिन्नेव प्रदेशे तिष्ठन् पुणेसुपेनामके विभागे
कदापि पुनर्नागच्छत्. तत्र च दादोजिकोंडदेवनामकं स्वामिभक्तं
विप्रं नियोजयित्वा तद्द्वारा सर्वं कार्यमकरोत्.

वाचकाः! एतावत्पर्यन्तं यन्मया श्रीशहाजिराजस्य चरितं
वर्णितं तत्र तदीयमलौकिकं बुद्धिचातुर्यं परिदृश्यत एव. नैतावदेव

दिल्लीश्वरं शरणं गत्वा क्रमागतान. दिल्लीश्वरोऽपि अनां विक्रुतमंधिर्मं महाजिराजस्य नाशार्थमाज्ञापयत्. यदि च शहाजिराज संतोषेण सर्वाणि दुर्गाणि तथा भूविभागान् मोक्ष्यति तदा न दण्डनीय इत्यपि विख्यापयामास. ततश्च दिल्लीश्वरः सर्वेण सैन्येन सह शहाजिराजं विजेतुमन्वधावत्. शहाजिराजोऽपि धैर्यमवलंब्य यथाशक्ति दुर्गानुरोधेनायुध्यत, परन्तु मोगलसेनासागरस्य पुरस्तात्सर्वमेव निरुद्धवीर्यो बभूव. ततो महता दुःखेन स्वकीयानि सर्वाणि दुर्गाणि तथा भूविभागान्दिल्लीश्वराय समर्प्य स्वयं विजापुराधीशं सेवितुं विजापुरनगरमगात्. विजापुराधीशस्तु तं गुणिनं स्वामिभक्तं शहाजिराजं सत्कृत्य पुनरपि तस्मै महादुर्गमण्डितान् भूविभागान् ददौ. शहाजिराजोऽपि लब्धसत्कारो विजापुराधीशं सपरिश्रमं सिंधुप्रवलजननिवासे कर्णाटकप्रदेशे तस्य विजापुराधीशस्य स्वामित्वं स्थापयितुं चिरमयुध्यत. महता चातुर्येण सर्वमपि कर्णाटकविभागं स्वाधीनीकृत्य विजापुरराज्यमर्यादामवर्धयत्. महता प्रदेशेन प्रवृद्धं स्वीयराज्यं विलोक्य सन्तुष्टो विजापुराधीशस्तं सर्व प्रदेशं तस्मै एव ददौ. शहाजिराजोऽपि तस्मिन्नेव प्रदेशे तिष्ठन् पुणेसुपेनामके विभागे कदापि पुनर्नागच्छत्. तत्र च दादोजिकोंडदेवनामकं स्वामिभक्तं विप्रं नियोजयित्वा तद्द्वारा सर्व कार्यमकरोत्.

वाचकाः! एतावत्पर्यन्तं यन्मया श्रीशहाजिराजस्य चरितं वर्णितं तत्र तदीयमलौकिकं बुद्धिचातुर्यं परिदृश्यत एव. नैतावदेव

तदा सेन समं गर्भवत्यपि जिजादेवी अश्वमारुह्याधावत. मध्ये गर्भस्य कठोरतयाऽश्वेन धावितुमशक्नुवानां [illegible] पप्रच्छ स्वगृहागमनाय परन्तु मानिनी सा तमत्यन्तं स्वपतिद्वेष्य सूत्य निरभर्त्सयत्. तथापि स स्नेहवात्सल्यात् सैनिकगोपितां तां कृ जामातृमित्रराक्षिते शिवनेरीदुर्गे निवासार्थं प्रेषयामास.

वाचकाः! अस्मिन् लोके जना उन्नतिं गतास्ते सर्वे म धना एव. यदि च मानवो मानं जह्यात्तदा तृणसमस्य तस्य नाम्नु तराशाऽपि. श्वाऽपि भूत्कृतो न पुनस्तस्य समीपमायाति. सोऽल लौकिको मानो योऽविरतं तेषु तेषु प्रसंगेषु शिवराजे पर्वदृश मातृतएव स समाजगामेति ज्ञायते. अनेनैव स पितृनयवनसेनामहा स्वतंत्रं राज्यमस्थापयत्.

अपर च तस्या सकलसंकटानुभवेन प्राप्तं [illegible] परमार्शात्. शहाजिराजः प्रतिदिनं नानाविधा विपदोऽनुभूय स्थापयितुं यदा प्रायतत, तदा माता जिजाद्व्यपि [illegible] सर्वं वृत्तमवलोकयामास. तेन कीदृश्यां विपदि धैर्यमवलंब्य निवारणार्थं कथमुपाया योजनीया इति सा सम्यगजानात्. पुनः शिवराजे प्राधान्येन प्रकटीबभूव.

भिमान् दोहदानन्वभवत्तथा स्वप्नांश्च दृष्टवती तथापि ... स्वप्नं साऽनुभवतिस्म. भगवती भागनुमिर्गौरूपाग्र द्विशालदन्तपंक्तिनाऽऽरक्तनयनेन ... राक्षसेन क्रान्ता भीतिविह्वला स्वप्राणरक्षार्थं कैलासवासिनं परमेश्वरं ... स शीघ्रमेव जिजादेव्या गर्भ प्राप्य निर्गतः ... जयतीति. इमं च स्वप्नं तथा यवनानां नाशार्थं जायमानां ... मनमिकृत्वा सा स्वगर्भवासिनं पुण्यश्लोकं गोब्राह्मणप्रतिपाल भविष्यन्तं मेने. वाचकाः ! ईदृशं शुभसूचकं स्वप्नं तथा दोहदं समनुभूय कस्यादिचित्तं संतोषं न भजेत! सा च तं स्वप्नं तथा दो... च स्वाश्रितेभ्यो ज्योतिर्विद्भ्यः कथयन्ती तानपि प्रमोदमग्न करोत्.

एवं महता सन्तोषेण परिपूर्णेषु नवसु मासेषु सा त्रैलोक्य माननीया जिजादेवी सकलगोब्राम्हणप्रतिपालकं सनातनधर्मर... शकस्य प्रवर्तयितारं श्रीच्छत्रपतिशिवाजिमहाराजं प्राची सूर्यमि... प्रासूत. वाचका.? सर्वतः क्रूरयवनैराक्रान्तेषु भारतवासिषु, व... निहन्यमानेषु ब्राम्हणेषु धेनुकेषु च, कोपातिरेकेण नाशितेषु देवाल... षु देवताप्रतिमासमूहेषु च, दासीक्रियमाणासु आर्यमहिलासु सा... साक्षाच्छंकरः सत्या जिजादेव्यास्तनयो भूत्वाऽवततारेति मन्यमा... जनाः परं ननन्दुः. तस्मिन्दिने निर्मलं रविप्रकाशं, मन्दमन्दवाहि... परिमलसुगन्धिनं वातं, तथा होमाग्नींश्च निर्धूमानवलोक्य साश्च...

(२)

वाचकाः! एवंक्रमेण मृत्युलोकमागतः शंकरः शिवराजरूपं धृत्वा प्रतिपच्चन्द्र इवावर्धत. यदा च स दशवर्षोऽभूत्तदा तं शिवं शहाजिराजो यवनराजधानीं विजापुरनगरमानयत्. शिवराजस्य त्रीणि वर्षाणि तत्रासीदिति प्राचीनेतिहासविदां मतं. विजापुरनिवसता श्रीशिवराजस्य बाल्येऽपि सद्गुणानवलोक्य शहाजिराजस्य चित्ते परं समतुष्यत्. तेषु च मुरारपन्तनामा यवनाधिपस्य प्रधानः शिवराजस्य गुणैः संतोषितः स्वस्वामिनः समीपे प्रशंसां चक्रे. तेन च विस्मितः स यवनाधिपः सभायां स्थितान् शहाजिराजानवदत् 'स्वपुत्रं राजसभामानयत' इति. शहाजिराजाअपि पुत्रं स्वस्वामिनः साक्षात्कर्तुं गृहमागताः शिवराजाय स्वामिनियोगं वस्तुतः स्वाभिप्रायं च निवेदयामासुः

शिवराजस्तु तं पितुर्नियोगं श्रुत्वा जितोऽपि धैर्यमवलम्ब्य जगाद 'तातचरणाः!' युष्माकं वचनं पवित्रमाज्ञारूपं. जानाम्यहमिदं सर्वं. यावज्जीवं भवदनुकूलमेव च. परन्तु यवनाधिपस्य सभां गत्वा पापी स यवनोऽयं इति न मे रोचते. वेदशास्त्राणि ... ...

इति तावत्पादा एव विचारयन्तु. मम तु बालस्येदमकर्तव्यमिति भाति' इति.

श्रुत्वा चेदं स्वपुत्रस्य शिवराजस्य भाषणं शहाजिराजा निभृतं परं मुमुदिरे. यतस्ते प्रथमत एव स्वतंत्रं राज्यं स्थापयितुमैच्छन्निति मया पूर्वमेव निवेदितं. तथापि लौकिकीं रीतिमनुसरन्तस्ते पुनरप्यवदन्—वत्स! शिवराज! त्वदुक्तं सर्वमेव सत्यं तथापि साम्प्रतं सर्व एव दक्षिणापथवासिनः क्षत्रिया यवनराजानां सेवका नाम भूत्वा ततः पारितोषिकलाभेच्छया स्वकीयानामेव राज्यानि अपहरन्तः आत्मनिवेशं प्रयतन्ते. यदि कश्चित् तादृशः स्वतंत्रमतिरन्यथाकुरुते तदा ते तं सहसा नाशयन्तः पारतंत्र्यस्य यवनाधीशान् साहाय्ययन्ति. तदास्मिन् समये पितृपितामहयवनानां सेवां विहाय यदि त्वं स्थास्यसि तदा सुखं लप्स्यसे. अन्यथा वर्तमानमपि विनाश्य महादुःखमनुभविष्यसीति.

पाठकाः! इत्थं यद्यपि कालानुरूपं शहाजिराजाः शिवराजमुपादिशन् परन्तु यवनानां शासनार्थमवतीर्णः शिवराजो न तेनोपदेशेन सन्तुष्टः स्वकर्तव्यपराङ्मुखो बभूव. इदमेव शिवराजस्यालौकिकत्वे मुख्यं प्रमाणं. ये ह्यसाधारणा जनास्ते स्वकर्तव्यं स्वयं निश्चित्य तस्मिन् प्रवृत्ता न कस्याप्युपदेशेन प्रवर्तन्ते निवर्तन्ते वा. अत एव 'मूढः परप्रत्ययनेयबुद्धिः' इति साधारणानां लक्षणं. अस्तु.

मनुसरामः. शहाजीराजाअपि राजसभागमने प्रतीपमतिं स्वपुत्रमालोक्य तूर्णीं तस्थुः, परन्तु विजापुराधीशः प्रतिदिनं तान् स्वपुत्रानयनार्थं वदत्. तेन चिन्ताकुलास्ते जिजादेवीं सर्वं वृत्तं कथयामासुः सा च महता प्रयत्नेन केवलं राजसभागमनार्थं शिवराजमनुकूलं चक्रे ततश्च पित्रा समं राजसभां गतः शिवराजः पितृवद्यवनाधिपमनत्वा साधारणरीतिमनुसृत्यैतरजनवन्ननाम. यवनाधिपोऽपि शिवराजस्य तेजस्विनीमाकृतिमालोक्य परं विस्मितः 'कोऽयं' इति मंत्रिमुख्यमपृच्छत्. सोऽपि शहाजिराजानामयं पुत्रः शिवराजनामेति निवेदयामास.

शहाजिराजास्तु स्वस्वामिनश्चंचलं स्वभावं तथा छिद्रान्वेषणतत्परान् स्वशत्रूंश्च जानन्तः पुत्रस्याभिवादनप्रकारं मनसि कृत्वा स्वामी मा कुप्यत्विति मनीषया सत्वरं प्राहुः —स्वामिन्. अयं मे पुत्रः कदापि एवादृशीं महतीं राजसभां नापश्यत्. नायं स राजसभारीतिं जानाति तेनेतरजनवदभिवन्दितः स्वामी. इम बालस्यापराधं दीनदयालुः क्षमाशीलः स्वामी मर्षयत्विति. यवनाधिपोऽपि शिवराजस्य तेजस्वि मुखमंडलं तथा भाग्योदयसूचिकां देहयष्टिमालोक्य सन्तुष्टः तस्मै महार्घाणि रत्नानि तथा वस्त्राणि च वितीर्य विसर्जयामास. शिवराजस्तु गृहमागतस्तानि सर्वाणि विप्रेभ्यो वितीर्य ससौ. अथ विजापुराधीशः शिवराजं प्रतिदिनं राजसभामागन्तुमाज्ञापयत्. शिवराजोऽपि तदागमनं पितुरनिष्टकरं मन्वानः कथंकथमपि


जगाम. तत्र मार्गे विक्रेयगोमांसानि पण्यगृहाण्यवलोक्य दुःखाकुलः शिवराज आत्मानं नरकवासिनं मेने. तान् गोघातकान् हन्तुमियेष. परन्तु पितृनियोगनिगडबद्धो न किंचित्कर्तुं पारयते स्म.

एकदा शिवराजः स्वपित्रा समं राजसभां गच्छन् मार्गे कृपाणेन गोः कण्ठं विदारयन्तं कंचन यवनमपश्यत्. तां च गोर्दीनां मुद्रां तथा भयकातरे चाक्षिणी निरीक्ष्य कोपपरीतमानसः शिवराजः पितृनियोगं सहसा समुल्लंघ्य तं यवनं यमालयं प्रैषयत्. तेन कुपिता यवना न्यायालयं गत्वा चुक्रुशुः. परन्तु शहाजिराजप्रेम्णा न कोला-हलं यवनाधिपो न शुश्राव. यदा च स्थाने स्थाने गोमांसपरिपूर्णानि पण्यगृहाणि द्रष्टुमसमर्थः शिवराजो राजसभागमनमेवामुंचत्, तदा राजसभायामेकाकिनं शहाजिराजानमवलोक्य पुत्रस्यानागमनकारणम-पृच्छत्. सनयाभिज्ञश्च शहाजिराजा यवनाधिपस्य प्रसन्नमन्तः-करणमवलोक्य विनयेन प्राह 'स्वामिन् ? आर्या हि गां देवतां मन्यन्ते. तस्या वधस्तान् दुःखाकरोति. राजसभागमनमार्गे च सर्वतो गोमांसविक्रयार्थं पण्यगृहाणि सन्ति. तानि द्रष्टुमपारयन् मम पुत्रोऽद्य राजसभां नाजगाम. स्वामिपादा यथा यवनानां तथाऽऽर्याणामपि. यतो हि यवना यथा स्वामिचरणान् सेवन्ते तथैवार्यास्तद्देशजाश्च. अतएवार्यधर्मपरिपालनं स्वामिनाऽवश्यमनुष्ठेयमिति. यवनाधिपोऽपि न्याय्यामेनां विज्ञप्तिं निशम्य सन्तुष्टस्तदानीमेव सर्वाणि गोमांस-पण्यगृहाणि ततो निष्कास्य नगराद्दूरदेशमनयत्. मोचयामास

कदाचित् सकलजनप्रार्थनयाऽऽवर्जितः परमात्मा शिवरूपेणाव यवनशासनं कुर्यात्? किंच पुरा खलु 'अस्मत्कुले शकस्य कर्ता भविष्यति'इति जगदम्बयाऽऽशीर्वादो दत्त इति श्वशुरचरणा मामवद तदपि कदाचित् सत्यं स्यात्? सर्वथा यवनाधिपरोषो मा भूदिति शिवराज इतो दूरे स्थले स्थापनीयः. अहं च तेन समं तत्र निवत्स्यामि यदि च शिवराजः सत्यमेव पराक्रमी भूत्वा शकस्य कर्ता भविष्य तदा वरमेव. अथ च नैवं तदा तदीयैर्दुर्वर्तनैर्युष्माकं त्रासो न भवेदिति

शहाजिराजाऽपि साध्व्या जिजादेव्या इदं भाषणं निशम्य तथैव कर्तुं मतिमकुर्वन्. तदानीमेव दादोजिकोंडदेवनामा शहाजि राजानां परमविश्वासपात्रं सेवकः कोशवितरणाय विजापुरनगरमायातः तेन समं शिवराजं पुण्यपत्तनं प्रेषयितुं कृतनिश्चयास्ते तमेकान्तेऽब्रु पन्. विप्रवर! त्वमसि मे द्वितीयं हृदयं मदीये शिवराजे केचनालौकिका गुणा दृश्यन्ते. स्वातंत्र्यप्रीतिश्च. तत्त्वं सुशिक्षणदानेन तं तथा संस्कुरु यथा पद्ममूला नैसर्गिकी स्वातंत्र्यप्रीतिर्महाफला भवेदिति.

स च विप्रवरः सेवकः शिवराजेन समं मातरं जिजादेवीं गृहीत्वा विजापुरनगरान्निर्गत्य कतिपयदिवसैर्महाराष्ट्रे पुण्यपत्तन



१ शिक्षणस्य सामान्यं स्वरूपं.
२ धार्मिकशिक्षणे गुरुर्माता जिजादेवी.
३ व्यावहारिकशिक्षणे च गुरुर्दादाजीकोंडदेवः.
४ दृढोद्योगकारित्वे पितृचरणाः श्रीशहाजिराजाः
५ नानाविधयुद्धसन्नाहे च यवनराजधानीनिवासः

(१)

वाचकाः ! सामान्यतोऽस्मिन् जगति ये खलु लोकोत्तरकर्मकारिणो मानवपुंगवा जातास्तेषां चरित्राणां सूक्ष्मया दृशाऽन्वालोचने तस्य कारणं प्राधान्येन शिक्षणमेवेति प्रतिभाति. इदं शिक्षणं पाठशालाभ्य एव लभ्यते नान्यत इति न कदाऽपि मन्तव्यम्. ये खलु स्वनामाक्षराणि लिखितुमपि न प्रभवन्ति तैरपि सुदुष्कराणि कृतानि कर्माण्यवलोक्य विद्वांसो विस्मयन्ते. योऽयं प्रसिद्धो दिल्लीश्वरो मोंगलकुलदीपोऽकबरनामा यवनराजोऽभूत् स स्वाभिधानवर्णानपि लिखितुं न प्राभवदिति प्राचीनेतिहासज्ञा वदन्ति. यद्यपि यादृश

दोषरूपेण फलभेदोपपादनं नोचितम्, सामान्यवस्त्वादृशभेदकरणे कोऽपि दोषः.

तत्र धार्मिकी परिस्थितिर्द्वितीयपरिस्थितेः कारणतया प्रथमं निर्दिष्टा, उचितमपीदं. यतो राजा नाम प्रजासमष्टिरूपा व्यक्तिः, यथा सभानियमपरिपालनार्थं तत्रस्थैरेव सभ्यैः सर्वानुमत्या कश्चन विद्वान् स्वपुरोगः क्रियते तथैव यदा न्यायेन स्वपालनार्थं प्रजाजनाः कांचित् सद्गुणशालिनीं व्यक्तिं सर्वानुमत्या स्वीकुर्वन्ति तदा तां राजेति व्यपदिशन्ति सर्वे जनाः. एवंस्थिते तादृशव्यक्तिनिर्णयार्थं प्रजासमुदायप्रविष्टा जनाः सुशिक्षिताः अपेक्षिताः. अन्यथा चौरग्रामे सर्वैश्चौरैर्मिलित्वा स्वपुरोगत्वेन निर्णीतः कश्चन महाचौरो राजपदवाच्यो भवेत्. नैवमस्ति. तस्मात् धार्मिकसंस्कारसंस्कृता जनाः यं स्वाधिपं मन्यन्ते स एव राजपदवीभाक् स्यात्. तथा च राजकीयपरिस्थितेः कारणं धार्मिकी परिस्थितिरिति अर्थादेव सिद्धं. सा यदि समीचीना तदा राजकीया परिस्थितिरपि समीचीनैव भवति.

धार्मिकी परिस्थितिस्तु तदा समीचीनेत्युच्यते यदा मानवाः परस्परं बन्धुभावेन वर्तन्ते, यदा परस्पर दुःखपरिहारपरा भूत्वा वर्तन्ते. एतदुक्तं भवति–आध्यात्मिकी परिस्थितिरेव धार्मिकपरिस्थितिशब्देनोच्यते. दृष्टचरं चैतत्, यदा हि राष्ट्रघटकानां जनानां चेतांसि कुसंस्कारैर्दूषितानि भवन्ति तदानीं तदखिलमपि राष्ट्रं यत्नाद्यमपि

रावणस्य केवलं वनवासिना रामेण वानरसाहाय्यं लब्ध्वा
पराजयः कृतः! सकलसामर्थ्यसंपन्नानां संख्ययाऽप्याधिकानां कौर
द्रौपदीच्छलेन कथं समूलं नाशोऽभवत्. अनाथाश्च पाण्
सत्यपक्षतया भगवताऽनुगृहीताः कथं व्यजयन्त, दुर्बलानां
तद्रक्षणार्थं कथं भगवान् स्वयमवतरति' इत्यादीनां कथानां
बालस्य शिवराजस्य चेतः सुसंस्कृतं चक्रे. सज्जनाः! इतिहासो
मूर्तिमती यथार्थज्ञानदायिनी पाठशालैव. ततो हि भिन्नभिन्नप्रकृ
जनानामुदयविनाशास्तथा तत्कारणानि च ज्ञायन्ते. इदं च मह
कर्म कृतं मात्रा जिजादेव्या यत् प्रथमतो बाल्ये एवाविकृतं
राजस्य चेतस्तया पुण्याभिः श्रीरामचंद्रादीनां कथाभिः पवित्रीकृ

किंच–माता जिजादेवी खलु जाधववंशसमुत्पन्नाऽ
तत्कुलपूर्वजा देवगिरिदुर्गे स्वतंत्रा राजानो राज्यमकुर्वन्. तांश्च
तदीया स्नुषाऽपि यवनैर्बलाद्दासीकृतेति सर्वं प्राचीनं वृत्तं सा
गजानात्. तथैव स्वपतेर्निजामशाहीराज्यरक्षणे दुःखानि,
कारागारवासं, स्वबन्धोस्तथा स्वपितुश्च निष्कारणं घातं
पश्यन्ती सा परं यवनानद्वेट्. इदं सर्वं स्वकुलवृत्तं बालाय शिवरा
निवेदयन्ती तत्पुरतो दुःखोद्वेगमसहमानाऽश्रूणि मुंचन्ती सा
मपि शिवराजं दुर्मदयवनस्वभावज्ञमकरोत्.

दुर्वर्तनादिभिर्यथा दूषितं न भवेत् यथा च धार्मिकशिक्षणेन संस्कारान् धारयेत्तथैव प्रत्यहं सावधानेनाचेष्टत. अतः शिवराजं धार्मिकशिक्षणे माता जिजाईत्येव गुरुर्नान्य इति सर्वेऽपि . श्रीरामदासस्वामिनस्तु तामेव नीतिमत्तां सदुपदेशेनावर्धयन्निति ते प्रथमगुरवः.

(२)

यथा हि सर्वेषां जनानां कृते धार्मिकं शिक्षणमावश्यकं तथैव व्यावहारिकमपि. ये खलु संसारे व्यवहरन्ति तेषां केवलेन धार्मिकशिक्षणेन कार्यसिद्धिर्न भवति. यतः संसारो नाम विविधविचित्रवृत्तीनां जनानां महद्रस्थानम्. तत्र हि केचन सज्जनाः, केचन दुर्जनाः केचन भीरवः, केचन चौरा, इति नानाविधाः प्राणिनो व्यवहरन्ति. तेषु च परानिष्टमकुर्वता स्वानिष्टं च परिहरता जनेन वस्तव्यमिति परं दुष्करं कर्म. एतदर्थं हि सज्जनेनापि व्यवहरता स्वयोगक्षेमायावश्यं व्यावहारिकं शिक्षणं मान्यमेव. तच्च व्यावहारिकं शिक्षणं तत्तद्व्यवहारानुसंधेन भिन्न भिन्न भवति. यथा हि पाठशालासु पठतां विप्राणां शिक्षणं, तथैव न क्षत्रियाणां नापि वैश्यानां. श्रीशिवराजश्चापारवीर्यसंपन्नानां . .आक्रमणानां क्षत्रियाणां कुलविख्याते वंशे समुत्पन्न इति तदीयं व्यावहारिकं शिक्षणमपि क्षत्रियकुलयोग्यमेव बभूव.

व्ययीकरणीयो नान्यत्रेति राजनीतिविदो मन्यन्ते. प्रजाकल्या
स्वकल्याणमिति राज्ञाऽवश्यं भावनीयं. यथा हि कुटुंबस्य पा
स्वीयकुटुंबपोषणे सदैव तत्परो भवति, स्वं च तदभिन्नं म
तत्सुखदुःखे आत्मीये एव मनुते, तथैव राज्ञा प्रजासु भाव्यं.
इदं च शिक्षणं दादोजिकोंडदेवेन श्रीशिवराजाय दत्तं. वाचक
श्रीशहाजिराजेभ्यस्तदीयकर्मसन्तुष्टेन विजापुराधिपतिना योग्य
विभाग पारितोषिकत्वेन वितीर्णस्तत्र दिल्लीश्वरप्रभृतीनामन्येषां
नाधिपानामाक्रमणानुरूपेण जना एव नासन्. केवलं पर्वताि

कृषीवलानाहूय भूमि सचस्कार. संरक्षिता गुरक्षिता सैव भूमिः
फलवत्यऽभूत्. दादोजिकोंडदेव स्वप्रजानां रक्षणार्थं स्थाने
न्यायाध्यक्षान् स्थापयामास तेषु च स्थित्वा यदा दादोजिः
कार्यं करोति स्म स शिवराजं स्वसविधे स्थापयित्वैव निर्णयका
तेन च शिवराजो न्यायकर्मण्यपि कुशलोऽभूत्. दादोजीकोंडदे
प्रदेशेषु कियान् न्यायी आसीदित्यत्र प्राचीनाः कथां कथयन्ति.

एकदा श्रीशिवराजेन सार्धं दादोजी राजधान्याः
प्रदेशं जगाम. तत्र विविधानाम् ... सहकारान् पश

स्तानि जगति लोकोत्तराणि कार्याणि कुर्वन्ति. तथापि पूर्वतो
निशे महाराष्ट्रे परमावश्यके ... दुर्योगे ... ता न ते ...
शातुं शक्नुतः. यथा ... ... निष्फलं भवति तथैव दुर्योगकालेन यदि ... शिवे. ...
नाः ? समाजे खलु कस्यापि कार्यस्य सिद्धिर्विघ्नैर्विना न भवन्ति.
हि सांसारिको जनः ... ... नरपतिभूमिभिर्विघ्नैराक्रान्तस्तदा
स्वं कार्यं विनैराक्रान्तमिति किमु स्तब्धं. एवंविधे विघ्नसनूह
प्रारब्धकार्यान्निवर्तनं न पौरुषं प्रत्युत तान् विघ्नान् दूरीकृत्य प्रारब्ध
कार्यस्य समापनमेव. अत्र च गुरु पूर्वेतिहास एव. ये हि लोको-
त्तराः पुरुषा जातास्तेषां चरित्राणि तथा कार्याणि चेतिहासे लिखितानि
बालको यदा पठति तदा स्वपूर्वजानां लोकोत्तरकार्यविधाने कियन्तो
विघ्नाः समागच्छन् कथं च ते तान्विघ्नानपास्य समारब्धानि कार्याणि
समापयन्निति सर्वं वृत्तं जानात्येव. तेन सञ्जातधैर्यः स प्रारब्धे
कार्ये सहसा विघ्नितेऽपि महता धैर्येण तत् समापयत्येव. वाचकाः !
इदमेवेतिहासशिक्षणस्य फलं. शिवराजश्च महाभारतप्रभृतीनितिहा-
सान् पपाठैव तथापि दृढोद्योगित्वं तु तदीयाः पितृचरणा एव
... इत्यत्र न सन्देहलवोऽपि. तैः खलु निजामशाहीराज्यस्य पालनार्थं
कथं प्रयतितं, कथं च दिल्लीश्वरेण समाक्रान्तेऽपि निजामशाहीराज्ये
धैर्यमविहाय पुनरपि स्वतन्त्रराज्यस्थापनार्थं प्रयत्नः कृतः, कथं च
तस्मिन्नुद्यमे निष्फले पुनरपि विजापुराधी...

पदातिविभागो युद्धशिक्षणं दत्वा पटुः क्रियते ! कथं ... उत्पाद्यन्ते ? कथं सेनाविभागानां भिन्नानि भिन्नानि शस्त्राणि ...प्यन्ते. कथं प्रवृत्ते दीर्घकालिके युद्धेऽखण्डानि ... स्थाप्यन्ते ? कथं च दुर्गाणि निर्मीयन्ते ? कथं चाराः स्वस्व... पुणा विधीयन्ते ? कथं च कोशाः संगृह्यन्ते' इत्यादिकं सर्वं साक्षादपश्यत्. तेन स परं प्रवीणोऽभूत्. यथाहि श्रीशिवराजः युद्धशिक्षणं जग्राह तथैव सामादीनां चतुर्णामप्युपायानां प्रयोग... मपि. स समये समये राजसभां जगाम. तत्र च विविधा वि... मतयो नाना महत्वाकांक्षिणः परस्परद्वेषपरा जना आसन्. ये ... महत्वाकांक्षिणो जनास्तेऽन्यान् स्वसदृशान् द्विषन्त्येव. तथा ... कथं परस्परं सामादीनुपयुंजते, कथं गूढचारैः स्वद्वेषिणां वृत्त... प्रयतन्ते, कथं स्वस्वामिचित्तानुकूल्यार्थं जाग्रति, कथं च प्रतिद्व... स्वशत्रून् युक्त्याऽतिवर्तन्ते, कथं संयीभूय कार्याणि कुर्वन्ति, ... स्वाभीष्टसिध्यै स्वजीवितमपि तृणीकुर्वन्ति, कथं स्वेष्टसाधने ... का भवन्तीति सर्वं भाविकार्योपयोगि शिक्षणं शिवराजो यवनराज... निवासादेव लेभे.



स्वराज्यस्थापनाकारणानि

१ निसर्गतः प्रदेशस्य दुर्गत्वम्.
२ यवनानां दुर्वृत्तैरसंतुष्टा बलिनः
३ पर्वतवासिजनानां निरतिशयं विश्वासपात्रत्वं.
४ यवनानां राज्येऽन्तःकलहाधिक्यम्.
५ मातुरुत्साहातिशयः

१

वाचकाः ! इह जगतीतले यानि खलु साधारणानि वाऽसाधारणानि वा कार्याणि जायन्ते तेषां स्थूलानि वा सूक्ष्माणि वा कारणानि भवन्त्येव. नहि कारणं विना कस्याऽपि कार्यस्योत्पत्तिरद्यावधि दृष्टचरं. तथाच या खलु महाराष्ट्रे स्वराज्यस्थापनाऽभूत्तस्याः कारणानि कानीति वयं विचारयामः. फलं चास्य विचारस्य तेषां ज्ञानमेव. अस्तु, यद्यपि पुरा निरूपिता परिस्थितिः कारणमत्र भवितुमर्हति तथापि सा यवनपीडात्मिका कृत्स्नेऽपि भारतवर्षे समा-

नैवासीत्. प्रत्युत यावद्धि आर्यावर्ते यवना दुर्वृत्ता आसंस्तावत्र राष्ट्रे. ये खलु दिल्लीश्वरप्रभृतयो यवना अजायन्त ते च मदंमदीयवंशजाः. महाराष्ट्रे तु ये खलु विजापुराधीशप्रमुखा राजा आसंस्ते च सनातनधर्मानुयायिवंशजा बलादेव मदंमदीय कृताः. ततएव च ते आर्यधर्मानुयायिभिः समं विवाहादिकमप्यकुर्वन् योऽयं विजापुरराज्यस्य प्रथमः स्वामी 'युसफआदीलशहा' नाम, खलु मुकुन्दरावनाम्नः शूरस्य महाराष्ट्रियस्य भगिनीं परिणीतवान् तस्याश्च पुत्रः पितुः पश्चात् सिंहासनमलंचकार. एवमेव निंबा करोपनामा कश्चन महाराष्ट्रियो विजापुराधीशस्य भगिनीमुपयेमे तात्पर्यमिदमेव–दक्षिणापथवासिनो यवनास्तथा तदधिपाश्च सनातनधर्मं तदनुयायिनो वा तथाऽद्विषन् यथाऽऽर्यावर्तवासिनः आर्यावर्तवासिनो रजपूतकुलसंभवाः क्षत्रियास्तु दुर्दान्तानां दिल्ली श्वराणां त्रासात् स्वात्मजास्तेभ्य' समर्प्यात्मानं ररक्षुः. नैकाऽपि दिल्ली श्वरकन्यका केनाऽपि क्षत्रियेण परिणीता. तस्मादार्यावर्ते दक्षिणापथे च यवनवर्तनेषु भूयान् भेद'. एवंसत्यपि महाराष्ट्र एव स्वराज्यस्थापना कथमभूदिति किं न विचारार्ह ? अस्तु.

सज्जनाः ? अत्र च प्रथमं कारणं महाराष्ट्रस्य नैसर्गिकी रच नैव. कृत्स्नोऽपि महाराष्ट्रदेशो दुर्गमाभिः सह्याचलशिखरमालाभि परिवेष्टित', दुष्प्रवेशाभिः पातालं प्रविष्टाभिरिव दरीभिः समलंकृत अतिशिखरविराजमानैः स्वातंत्र्यदेवीनिवासभवनैरिव स्वावंश्यपूर्ण

वृत्तैः शिरोभूषणैरिवागणितैर्दुर्गैः संकुलः, अविच्छिन्नवृक्षराजिपरि-
च्छिन्नैर्वनसमूहैः संकटितोऽप्यपि वर्तते. ये खलु प्रायः पर्वतवासिनो
नास्ते प्रकृत्यैव स्वातंत्र्यप्रिया इतीतिहासेभ्योऽपि दृष्टचरं. महाराष्ट्रं च
सपर्वतमाश्रित्य परकीयशत्रुभ्य आत्मानं तद्वासिनोऽरक्षन्. ये खलु
ख़ीलजीप्रभृतयोऽपारसैन्यसमन्विताः ते महाराष्ट्रं जेतुं सर्वथा प्रयत्न-
नाअपि न फलं लेभिरे इत्यत्रापि कारणं पूर्वोक्तमेव. ये च
गमिनिविडामध्यप्रदेशप्रभृतयो देशाः सन्ति तेषु तादृशदुर्गमप्रदेशा-
भावात्प्रदेशस्य समानतया शतघ्नीबलेन सर्वमपि जेतव्यभूविभागं
स्वसात्कुर्वन्तो यवनाधिपास्तांस्तान् प्रदेशानजयन्. स्वायत्तांश्चा-
पुः. महाराष्ट्रं तु तादृशप्रचण्डशतघ्नीवाहकानां शकटानां दुष्प्रवेश्य-
त्वादयं देशो बलिष्ठानामपि यवनाधिपानां दुर्जयोऽभवत्.

(२)

वाचकाः ? निरूपितमिदमेकं कारणं. अपरं च सर्व भारतवर्ष-
स्य लब्धस्वास्थ्यानां यवनाधिपानां दुर्दैवैरसंतुष्टा बलिनः.सज्जना ?
न्यचिन्मदान्धेन सार्वहीना एव पीड्यन्ते न बलिनस्तावत्
पीडा परिपच्यति. नापि तस्याः कोऽपि परिणामो भवति. परन्तु
दा दीनपीडयाऽलब्धदुःखः स बलिष्ठानपि तृणीकृत्य पीडयितुमिच्छ-
प्रयतते च तदा स सत्वरं स्वीयकर्मणः फलमश्नुते. अनेन
रम्पो यवनानां विषये. यवनाश्च प्रथमतः शनैः शनैःसम्पन्नबलिष्ठा

[illegible]नाम [illegible] पोऽयन्धोऽचिराद्[illegible]ष्ठान् क्षत्रियानपि पीडयितुं [illegible] [illegible] एव [illegible] [illegible]. महाभागाः ? [illegible] [illegible] [illegible] विचारयामः.

[illegible] क्षत्रियराजानश्चैव [illegible] [illegible] [illegible] पर्व [illegible] [illegible] [illegible] [illegible] [illegible]. [illegible] [illegible] [illegible] [illegible] [illegible]. योऽयं प्रतिष्ठित [illegible] [illegible] महाराज [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible].

[illegible] [illegible] [illegible] [illegible]. [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]. [illegible] [illegible] [illegible] [illegible]. [illegible] [illegible] [illegible] [illegible]. [illegible] [illegible] [illegible].

[illegible] [illegible] [illegible] [illegible] [illegible] [illegible]. [illegible]

[illegible] वा स्वाधेन [illegible] स्वस्वैश्वर्यस्य वृद्धिमभ्यैव प्रय[illegible] परस्परं [illegible]।

एवमन्यदपि [illegible] [illegible] तथैतत्. यतः सर्वे एव यवनाधिपा यस्य कस्यापि आप्तां वा कन्यां वा यदा स्वयमभिलषन्ति तदा तां विवाहार्थं तु नेच्छन्. प्रतिपित्रादयो च तस्याभिप्रायं तां [illegible] युद्धानि चक्रुः. इदं च स्वस्वाभिनां परस्परा[illegible] तथैवा-चरन्त. तेन प्रजानां दु[illegible] इमा च स्वकीयानां दुर्व्यवस्थानां [illegible] अनुभवन्. यवनाधिपानां च परस्परा-भिलाषं यवने[illegible] प्रवर्धितं घोरं युद्धं तथा तेनैव विहितं कर्ण[illegible] सुतरां कथयति. अस्तु.

अपरं च सार्वभौमा दिल्लीश्वरप्रभृतयो यवनराजाः सत्यं महात्मानः आसंस्तथापि सर्वे [illegible] पुरवासिनीनां राज्ञीनां कलहे-स्वस्थचित्ता एव । [illegible] विविधाः स्त्रियो न्यराजन्. [illegible] च ताः मद्यपाः अपि अधिकाः. ताश्च यवनाधिपस्य चित्तं स्वानुकूलं विधातुं प्रयतमाना असूयान्विताः कलहांश्चक्रुः. साम-न्तादयः तासां पक्षपातिनो भूत्वा परस्परं, तेनापि यवनराज्ये स्वास्थ्यं नासीत्.

(३)

पाठकाः? महाराष्ट्रे स्वराज्यस्थापनाया यथा पूर्वोक्तं का द्वयं तथा तृतीयमपि सह्यपर्वतवासिनां जनानां निरतिशयविश्व पात्रत्वमपि कारणमास्ति. यत्र हि स्वल्पलाभलुब्धा जनाः स्वकी तथा स्वमातृभूमिं भस्मसात्कुर्वन्ति तत्र नाशाऽस्ति स्वातंत्र्यस्य. स्व श्चैदेवी तत्रैव तिष्ठति यत्र सर्वेऽपि जनाः परस्परं परमप्रीत्या विश्वा सेन च वर्तन्ते. इह च सह्यपर्वतवासिषु मावळजनेषु परक यद्यपि ते दारिद्र्यपीडिता अंधमग्ना एव, सांप्रतमिवं स्वोदरपू स्वक्षेत्रसंस्कारे मग्ना एव, तावताऽपि क्षुन्निवारणपर्याप्तमपि अन्नं लभमेव, तथापि तेषां शीलं क्षत्रियेभ्योऽन्यूनमासीत्. ते च व स्वनायकमनन्यन्त तदाज्ञां प्राणात्ययेऽपि नातिक्राम्यन्. परस्त्री मातृवद्दृष्टिः, परद्रव्येषु निरासक्तिः, गुणेषु आदरः, स्वामिकार्ये वर्तित्वं, इत्यादयो गुणाः प्राधान्येन तेष्वदृश्यन्त. अन्येऽपि 'क्षुत्पिपासासहत्वं, शीतोष्णपर्जन्यवातसहनसामर्थ्यं, निरन्तरं वन सांनिध्यतः प्राप्तं निर्भीकत्वं, शस्त्रोपयोगपाटवं, अंगीकृतकार्यनिश्च त्वं, सदा गगनभेदिसह्याचलगिरिरोहणेन शरीरसौष्ठवं, शि शरसंधानकौशलं, इत्यादयः स्वातंत्र्यसंपादनरक्षणकारणीभूता गु स्तेषु व्यराजन्त. किं च यथा हि यवनानामतिसांनिध्यव आर्य वासिन आर्या आर्यमर्यादाभ्रष्टास्तथा नैते सह्याचलवासिनः अ

इतो तु तादृशोत्तमनगराभावादतीव विरला यवना आगच्छन्. तेन
ते स्वकीयां परम्परामभुंचन्. असत्यभाषित्वं हि राजनीतिपारगैः
तैत्र्यत्वेन व्यपदिश्यते. यो हि भूयोभूयोऽसत्यं प्रलपन् स्वभावतः
रलान् जनान् वंचयति स 'राजनीतिचतुर' इति सन्माननीयेन शब्देन
पदिश्यते. सज्जनाः ! यस्यां कस्यामप्यवस्थायामसत्यभाषित्वं नाम
अंमेव. यद्यपि क्षणमात्रं मिथ्यावादस्य शुभं फलं दृश्यते तथापि
परिणतोऽशुभात् फलाद्गत्यन्तरमिति न प्रामाणिकानां प्रवृत्त्यर्हः.
किम जना सकृद् द्विर्वा मिथ्याभाषणेन विप्रलभ्यन्ते परन्तु
स्ते सत्यवचनेनाऽपि स्वानुकूलयितुं विश्वासुमयोग्या भवन्ति.
तेनैव मावळेजनानां गुणानवलोक्य श्रीशिवराजो महाराष्ट्रे स्वराज्यं
स्थापयितुं प्रायतत.

(४)

वाचका ? यथेमानि कारणानि तथाऽन्यदप्येकं कारणमस्ति.
तद्-आर्यावर्तेदक्षिणापथस्थापितानां निजानां यवनराजानां परस्परं
विरोधित्वं, तथा तत्तत्स्थाननियुक्तानां प्रधानाधिकारिणामनेककारण-
त्. तथाहि-यदा खलु श्रीशिवराजो जिजाईकुक्षौ जातो तदा तु
त्रांतवर्ते मोगलकुलभंभरः शहाजहानाख्यो दिल्लीपतिः राज्यमकरोत्.
दक्षिणापथे च कुतुबशाही-आदिलशाही-नामभ्यां प्रसिद्धे द्वे राज्ये
आस्ताम्. स च दिल्लीपतिरेतत्सर्वं दक्षिणापथवर्तिनी राज्ये
आत्मसात्कर्तुमैच्छत. तदापि च तत्कीफारस्मारबेषां, एवस्थिते


स्वभावत एव शूराणां महाराष्ट्रवासिनां साहाय्यमैच्छताम्. यदा
मोंगलकुलसंभवो दिल्लीश्वरो विजापुरराज्यमात्मसात्कर्तुमाययौ
विजापुराधीशो विस्मृत्य प्राचीनं द्वेषं शिवराजं साहाय्यविधा
प्रार्थयत. इमं च यवनराजानां परस्परं द्वेषमालोच्य शिवराजः 'यथै
भिन्नैः पूर्वजानां परस्परद्वेषं निमित्तीकृत्य सर्वेऽपि ते विनाशि
स्वराज्यं च स्थापितं, तथैवास्माभिरपि एतेषां कलहायमानानां
निमित्तीकृत्य कुतो न पूर्ववदेव स्वराज्यं स्थापनीयं' इति चिन्तयामा
अपिच–दिल्लीश्वरप्रभृतयः सर्वे एव यवनराजाः स्वज्येष्ठबन्धो
पितुर्वा घातेन सिंहासनमलभन्तेति प्राचीनेतिहासेषु स्पष्टमेव.
मेव रीतिं राज्यव्यवस्थार्थं स्थाने स्थाने नियुक्ताः सेवकाअपि
मेवान्वसरन्. यदा हि कश्चन सेवको महति प्रान्ताधिपपदे नियु
स शीघ्रमेव स तस्य प्रान्तस्य रक्षणाय स्थापितायाः सेनायाः साहाय
लब्ध्वा स्वतंत्रो भवितुमचेष्टत. दिल्लीश्वराअपि नीचजनसहायाः
मिभक्तानपि दण्डयामासुः. तेन सेवकाअपि स्वामिद्रोहिण एवाभव

५

यान्धवाः ? यथामति मया महाराष्ट्रस्थानि स्वराज्यस्था
कारणानि निरूपितानि. परन्त्वेकं प्रधानं कारणमवशिष्टम्. तदि
यद्यपि बहवो जनाः किमपि लोकोत्तरं कार्यं कर्तुं वांछन्त्येव,
तदीयाः संबंधिनो नानाविधैरुपायैस्तदुत्साहभंगं कुर्वन्तस्तस्मा
मार्गं निवर्तयितुं प्रयतन्ते. इदं च बहुभिर्दृष्टं समनुभूतं च.

यत्तु शिवराजस्य महाभाग्येन वा, कुलक्रमागतपुण्येन वा, दुर्ग-
मप्रान्तवनप्रदेशपर्वतनिवासिनां स्वदेशनिष्ठमल्लानां सुहृदां वा सखीनां साह्येन
वा, माता जिजाबाई शिवराजस्य जनन्यभूत्. माता जिजाबाई नैसर-
र्गिकं प्रज्ञैश्वर्यं किन्तु पैतृकनिर्धारिणी धीरमाताऽप्यासीत्.
सा तु स्वराज्यस्थापनार्थं शिवराजं यथा प्रोत्साहयति स्म तथा शिव-
राजः स्वमातृतो विमलनिर्मलविनयवन् महान्तमुत्साहमलभत्.
कथमतः ? दिल्लीश्वरप्रभृतयो यवनराजाः समानं भारतं सपादमस्य
उन्नतिशीला अपारधनसैन्यनायका ग्रीष्मभास्करा इव दुर्दर्शा आसन्.
तदानीं हि. सह विरुद्धं स्वराज्यस्थापनं नाम विषपुष्पमात्मनाश-
नाऽलमिति भवन्त एव विचारयन्तु. एवंविधेऽपि स्वदेशमेकाकिनं
पुत्रं शिवराजमस्मिन् कर्मणि नियोक्तुं योजयन्ती माता जिजाबाई
कथं न स्तुत्या? अतएव निरूपितेषु सर्वेषु स्वराज्यस्थापनाकारणेषु
प्रधानं कारणं मातरं जिजाबाईमिति मन्ये.





सहायलाभः.

१ देशमुखानामैक्यवृद्धिः.
२ मावळेप्रमुखानां विश्वाससंपादनं.
३ स्वमांत्रिणो दादोजिकोंडदेवस्यानुकूल्यं.
४ धनसम्प्राप्तिः

(१)

वाचकाः ! शिवराजो विजापुरनगरान्निर्गतः पुण्यपत्तनं उप गत्य तत्रैवोवास. स चानुभूतयवनराजशासनस्वरूप उद्विग्न सह्यपर्वतमण्डिते स्वपितृचरणसंपादिते भूविभागे स्वयं वीक्ष पर्यटत्. प्रकृत्यैव सरलमतिः शिवराजो मध्यान्हकाले कस्मिं ग्रामे भोजनार्थं स्थितस्तत्रत्यैर्ग्राममुख्यैः समं संलपंस्तैः स साधारणं किमपि अन्नं भुंजानः स्वस्मिंस्तेषां प्रीतिमुत्पादयाम तेऽपि दारिद्र्यपीडिततया स्वामिपुत्रसत्कारेऽसमर्थाः स्वयमागत्य संलापिता आत्मानं कृतकृत्यानमन्यन्त. शिवराजश्चाजन्म सर्व धारी सर्वत्र प्रचचार. कदाचिदतिदुर्गमदुर्गनिरीक्षणार्थं सेवक एकाकी ययौ. तस्य चेतसि राजपुत्रत्वदुरभिमानः पदमपि न अनया समवृत्त्या शिवराजस्य यशः सर्वत्र प्रससार. सर्वेऽपि

नाट्यिया: स्वनिवासं चरणपूतिस्पर्शेन पावयितुं तं प्रार्थयन्. [illegible]
गर्दीयामन्यतमां [illegible] च सनिवासं नाथा सार्धं [illegible]यामास. एवं
[illegible] साहाय्यं तथा तत्संबंधिनं गुणिनां पर्यटित्वा शिवराज
[illegible] सर्वथा स्वराज्यस्थापनार्थं योग्यं स्थानमिति निश्चय [illegible]
निर्णीय चैत्र जनसंपदं, मणिसंपदं, धनसंपदं च वितीर्य: क्रमेण
संवर्तन. शिवराज: स्वराज्यस्थापनार्थं यदा सह्याद्रौ पर्यटितवान् स
पत्र बहून् देशमुखानपश्यत् इमे च देशमुखा केवलं नियतं कर-
स्वयं विजापुराधिराज प्रदत्त सर्वत्र [illegible] ते च स्वराजित-
मनुष्य सेनां स्थापयित्वा कदापि [illegible] समानीतदृष्टौ
[illegible] कुर्वन्त [illegible] [illegible] च मानपना [illegible]
[illegible] परस्परमकटटादन्त [illegible] प्रतिदिनं युद्धानि प्रावर्तन्त
शिवराजस्य तान [illegible] स्वानुकूलान विधातुं प्रयतमानस्यापि
[illegible] महामयत्. [illegible] स्वदेशस्य स्वधर्मस्य च दुरवस्थां तेभ्यो
[illegible] स्वराज्यस्थापनोत्तरमात्मानं साहाय्यवितुं विज्ञापयामास.
[illegible] च क्षत्रियकुलसंभूता महता सन्तोषेण स्ववैराणि त्यक्त्वा
[illegible] साहाय्यवितुं शपथं चक्रु: गुणसिद्धकुलसंभूता नरेश्वर-
[illegible] शालीनामा देशमुख प्रथमत एव शिवराजं साहाय्यवितुमु-
[illegible] रोहिडपर्वतवासिनो रोहिडेश्वरनाम्न. शंभो पुरत: 'अहं
[illegible] त्वां स्वराज्यस्थापनार्थं साहाय्यविष्यामि ' इति शपथं चकार.
[illegible]पुराधिष्ठेन तत्स्थानस्थापितेन स्वयं विजापुराधिपेन च प्राणदण्डे

तर्हितोऽपि न स स्ववचनं पूरयामास. एकदा तु केनापि पू[illegible] निरतिशयवनाप्रियकोपः स्वगृहं विहायारण्यमेवावसत्. प[illegible] देशमुखाः स्वसहायेन शिवराजेन वशीकृतास्तत्पश्चात् अभ[illegible] ने च सेनाध्यक्षेन [illegible] च समये समये स्वयं सम[illegible] शिवराजं साहाय्ययामासुः.

(२)

[illegible] देशमुखान् स्वानुकूलान् [illegible] [illegible]

[illegible]

सखेरनारामुत्प्रेक्षमाणो नानुकूलोऽभवत्, परन्तु यथा यथा स शिव-
राजस्य गुणांस्तथा प्रतापानपश्यत्तथा तथा तदीयभाग्योदयं [प्र]-
पीतमनाय आनुकूल्येनावर्तत. स च स्वामिभक्तः सेवको वा[र्धक्य]-
रोगपीडितो जर्जरितकलेवरो मृत्युशय्यायां पपात तदा स समी[प]-
शिवराजं महता प्रेमातिशयेन जगाद—शिवराज! सम्प्रति ये
यवना अस्मान् परं तापयन्ति. प्रतिपदं धर्मनाशं कुर्वाणा अ[स्म]-
ब्राह्मणान् पीडयन्ति गवां च प्राणानपहरन्तः परं पीडयन्ति. ए[षां]
नाशाय प्रयतनीयं भवता. नवानि पल्लवान्ता इमे. अस्मदीयाश्च अ-
भवति [illegible] गुणिनं भवन्तं
[illegible] तन्नाशाय प्रयतमानं शक्तिमन्तं [illegible]
[illegible] महाराष्ट्रभूमि [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

(४)

[illegible]
[illegible]
[illegible]

'फिरंगोजिनरसाळा'भिधं महाराष्ट्रियं स्वानुकूलं विधाय स्वा
नधेव सिंहगडदुर्गाधिपं यवनं द्रव्येण वशीकृत्य तदपि
हस्तागतमकरोत्.

वापकाः ? इत्थमनेकानि बलास्थानि दुर्गाणि केवलं
भ्येव श्रीशिवराजः स्वाधीनान्यकरोत्. अत्र च तदीये राजनीति
स्पष्टमाभाव्यते. अस्मिन् समये शिवराजः केवलं विंशतिवर्ष
एतास्वरूपे वयसि एतादृशाडो दीर्घकार्यविधाने न दैवं कर्म
नु सत्य. अस्तु.

(२)

दिवंगते दादोजीकोंडदेवे श्रीशहाजिराजसंपादितस्य भूवि
गस्य व्यवस्थां स्वयं शिवराज एवापश्यत्. एकदा शहाजीराजा
सेवकान् द्रव्ययाचनार्थमागतान् 'अस्य भूविभागस्य करद्रव्यं व्य
स्थापनार्थमेव न पर्याप्तं. कथमपि वयमिमं विभागं पालयाम' इ
कथयित्वा प्रतिप्रेषयामास. शहाजीराजाअपि श्रुतपुत्रकीर्तयः सन्तुष्
शिवराजकर्मणा क्रुद्धात् स्वाधिपात्किंनापे अनिष्टमाशंकमानाः कर्णाटक
विभागमगच्छन्. परन्तु शिवराजस्येदं कर्मानिष्टं मन्यमानाः केच
श्रीशहाजिराजसुहृदस्तत्रासंस्तेभ्य इदं नारोचत. तेषां च मुख्
'संभाजिमोहिते' नामा कश्चन श्रीशहाजिराजानां श्यालः शि
राजस्य सापत्नमातुर्भ्राता सुपेनाम्नि भूविभागेऽवसत्. स हि वार्षि
करद्रव्यमदत्वा स्वतंत्रवदवर्तत. आश्विकानां शतत्रयेण गर्वितः शि
राजं नागणयत्. तदीयमिदं वर्तनमवलोक्य क्रुद्धः शिवराजो माव
जनसेनां गृहीत्वा एकस्मिन् मध्यरात्रे तमाक्रम्य पराजित्य सर्वं क
जग्राह. पराजितोऽपि स्वमातुलं महतादरेण स्वसमीपे स्थातुं विज्ञप्
नंगीकुर्वन्तं तं प्रेमातिशयेन व्यसर्जयत्. इत्थं स्वमातुले नि.पक्ष
वर्तमानं शिवराजं सर्वे जना अस्तुवन्. ये च तटस्थास्तेऽपि तटस्
विहाय शिवराजपक्ष्या भवितुमैच्छन्. ये च शत्रवस्ते मातुलशासन
भीताः क्रमेण वैरमत्यजन्. युक्तं चैतत्! कथमन्यथा श्रीशिवराज
महत्साम्राज्यमिह लोकेऽभविष्यत्. लोके हि साधारणा जनाः पुत्र

ये खलु त्वदीयं यशः श्रुत्वोदरभरणार्थं सेवेच्छया समागताः ते निराकार्ये न सम्यक्. वर्धिष्णुना राज्ञा सर्वजातीयाः प्रजाः स्वस्व धर्माचरणानुरोधेनानुगृह्य पालनीयाः. यद्यार्या एव संग्राह्या इति मनीषा यदा कथं समग्रं भारतसाम्राज्यं सिध्येत्? किंच यदीमे यवन इति समुपेक्ष्यास्तदाऽत्यन्तमनुचितं. यथा हि यवनजातौ नीचाः सन्ति. तथैवोदाराः कृतज्ञा अपि. यथा च सर्वेष्वपि मानवेषु कृतघ्ना कृतज्ञाश्च जनाः समुपलभ्यन्ते तथा महंमदीयेष्वपि. किं न सन्ति सहस्रशः कृतघ्नाः क्षत्रियाः? किं न 'रणदुल्लाखान'नामा यवन एव तत्रभवतां शहाजिराजानां परमः सुहृत्. तस्मादवश्यमिमे संग्राह्याः. यो हि वर्धिष्णुस्तेन सावधानेन भाव्यं. अस्मासु च सावधाने- षु न किंचिदत्याहितं भविष्यतीति.

इद चोपयुक्तं वचनं निशम्य शिवराजस्तान् सर्वान् स्वसेवा यां न्यधात्. तेऽपि कृतज्ञाः कार्याणि कुर्वन्तः समुखमवसन्.

(४)

यथा यथा शिवराजः शत्रून्विजित्य दुर्गाणि भूविभागान् ... स्वायत्तानकरोत्तथा तथा नानादेशेभ्यो गुणिजना वसन्ते सहकारमिव भृंगाः सेवितुमाययुः. शिवराजोऽपि तान् सर्वानेव सत्कृत्य स्वसंनिधौ स्थापयामास. स च स्वराज्ये राजनीतिप्रवीणान् न्यायाधीशान् स्थापयित्वा प्रजाः पुत्रवद्शात्. तेन सकलाअपि प्रजाः

इति. इदं च तस्य दीनं वचनमाकर्ण्य सन्तुष्टस्तदीयान् सर्वान्
भ्रातृंस्तथा मातरं तेनापि समं स्वसेवायामस्थापयत्. अयमेव दत्त
सकलमहाराष्ट्रसाम्राज्यस्य प्रधानमंत्री बभूव. वाचकाः! केवलं नतान्
प्रधानराजपुरुषान्तर्गततया निर्दिष्टः. वस्तुतस्तु घोरपडे, शिर्के, सरनोबत
घाटगे, निंबाळकर, गुजर, पाळकर, जगतापीत्यादिभ्यः सुप्रसिद्धेभ्य
क्षत्रियकुलेभ्योऽसंख्याः शूराः समागत्य शिवराजसेनायामुच्च
पदान्यलंचक्रुः.

एवंरीत्या तांस्तान् राजकार्यचतुरान् पुरुषान् प्राप्य सन्तुष्ट
शिवराजः स्वसेनां व्यवस्थितां कर्तुमियेष. आद्यावधि तु ये केव
महाराष्ट्रीयास्तरुणाः स्वयमागतास्तांस्तथा शहाजीराजसंपादित
भूविभागस्य रक्षणार्थं येऽधिका आसंस्तांश्च गृहीत्वा महद्
साहसेनोपरिलिखितानि शिवराजः कार्याणि चक्रे. इदानीं तु
आक्रान्तप्रभूतदुर्गः सम्प्राप्तधनो लब्धभूपालनार्थं, तथा पुनर्नूतनभू
संपादनार्थं सेनावृद्धिमपेक्षमाणस्तामेव चक्रे. यद्यपि शास्त्रे सेनाया
श्चत्वारि अंगानि कथितानि, तथापि पर्वतमये महाराष्ट्रे गजानां
तथा रथानामनुपयोगं पश्यन् चतुरः शिवराजस्तीक्ष्णाग्रभल्लमण्डित
नामाश्विकानां तथा खड्गधारिणां पदातीनामेव सैन्यं विरचयामास
सर्वस्मिन् भारतवर्षेतिहासे महाराष्ट्रीयाणां भल्लक्षेपः सुप्रसिद्धोऽस्ति
तथैव धानुष्काणां शरसंधानं. धानुष्काश्च निभृतं वृक्षशाखासु



१ विजापुराधीशस्य कापट्यम्.
२ शिवराजस्य मातृभूमिप्रीतिः
३ शहाजीराजानां कारागारवासः.
४ शिवराजस्य राजनीतिचातुर्यं.
५ कार्यसिद्धिः.

(१)

एवं सर्वदा विजयमानं नानादुर्गसमाक्रमणेन वर्धमानं शिवराजं समाकर्ण्य विजापुराधीशश्चिन्तातुरो मन्त्रिभिः समं किं कर्तव्यमिति विचारयामास. मारकेशान्वतिमुख्याः प्राय सर्वे यवनाधिकारिणः शिवराजतो भीताः स्वरक्षणार्थं तं प्रार्थयन्त. यदा तु कस्याप्यवकाश [illegible] ईश्वरः स्वयमागत्य योद्धाऽभवत् तथा छलनस्य कस्याप्य [illegible] पर्यंकरलक्ष्मआश्रयपदा स शिवराजमनुरोद्धुं मेने. स च कार्

साहाय्ययितुं प्रजिष्यन्ति तदा तु सुतरां राज्यस्य हानिरेव. तत्
कपटेन शहाजीराजाः समाहूय प्रतिबन्धे स्थापनीयाः. पितुं
प्रतिबन्धस्थं प्राणसंकटपतितं समवलोक्यावश्यमेव शिवराजः क्ष
याचितुमागमिष्यति. सर्वथाऽस्मिन्नर्थे कपटाचरणं विना न गत्यन्
रमिति. चिन्तयित्वा चैवं स कपटी विजापुराधीशः कर्णाटकविभा
एव स्थितं बाजीघोरपडेनामकं स्वसामन्तं कपटेन श्रीशहाजीराज
बन्दीकृत्य विजापुरनगरं प्रेषयितुं दूतद्वाराऽऽज्ञापयामास. सोऽपि
राजशासनं शिरसा स्वीकृत्य शहाजीराजान् भोजनमिषेण समा
बन्दीचकार.

इत्थं स्वामिनियोगाद्बाजीघोरपडेसामन्तः सावधानेन श्रीशह
जीराजान् बन्दीकृत्य विजापुरनगरं प्रेषयामास. विजापुराधीशः स्वम
नोरथं सफलमवेक्ष्य प्रमुदितस्तान् पर खिन्नान् शहाजीराजानगद्,
'यदि त्वत्पुत्रः शीघ्रमेव क्षमां याचितुं नागमिष्यति तदा त्वं प्रा
र्वियोक्ष्यसे' इति.

परमसज्जनाः शहाजीराजास्तु स्वस्वामिन इदं निष्ठुरं व
निशम्य क्रुद्धा अपि स्वामिमर्यादाभंगभिया स्वापमानं चोत्प्रेक्षमाणाः
न्विमवलम्ब्य प्रत्यवोचन् स्वामिन्! यदा मया निजामशाहीराज्यं
श्वराद्रक्षितुं प्रयतितं तदैव यदि स्वतंत्रराज्यस्थापनेच्छा मेऽभविष्यत्
न तदन्नस्यमभविष्यत्, किंतु अस्मत्पजातीयैष्वेव कलहं प्रव

लिखितुं दर्शयितुं च समर्थेति अहं मन्ये. इतः परमपवित्राः स्म संस्मरणीयाः पूज्यास्तातपादाः, इतश्च गार्हस्थ्यं प्रयत्नैः संवर्धित शुभोदर्कस्य गोब्राह्मणरक्षार्थं स्थापितस्य स्वराज्यस्य अन्य नाशः. इतो नैसर्गिकी पितृभक्तिः, इतोऽनिवार्या स्वदेशभक्ति- इतश्च पितृद्रोहपातकं, इतश्च मातृभूमिद्रोहपातकं. इतश्च पित्रा ज्ञापरिपालनपुण्यं, इतश्च सकलभारतवर्षहिन्दुजातिमत्सरकलुष इतश्च निरतिशयस्वातंत्र्यलालसा, इतश्च तातानिष्टाशंका. इत कुलदोषपातः, इतश्च कर्तव्यवैमुख्यदोषः. एवं दोलायमानचे कमपि एकं पक्षमवलंबितुमशक्नुवानः शिवराजः स्वमंत्रिमण्डलै समं विचारयामास. परन्तु तेऽपि कर्तव्यविमूढा न किमपि निश्चित्य वक्तुं पारयांबभूवुः.

अथ किंकर्तव्यतामूढो दुःखव्याकुलः शिवराजः शयना गत्वा शयनीये निपत्य विचारयामास. भगवन्! जानकीजाने! किं भूयोभूय ईदृशैर्दुःखराशिभिः संयोजयन् परीक्षसे? नाथ! यद्य तातचरणाः परं प्रियास्तथापि मातृभूमिः सर्वतो वंद्या. मातृभू यवनाक्रान्तां भारतीयांश्च पशुवत् परकीयसेवानतान् नहि पातिव्रत्यस्य तथा गवां ब्राह्मणानां, विप्राणां धर्मस्य च नाशं पश्य यथा दुःखी भवामि न तथाऽन्येन केनापि. अपि मा अस्मत्कुलसंभव शिवराजेन मातृभूम्युद्धारार्थं स्वतातचरणाः समुपेक्षिता इति वदे

तदाऽपि स श्वशुरचरणान् मोक्ष्यतीति कथं श्रद्धेयं. प्रत्युतास्मत्
तथा श्वशुरप्राणानां च याचनार्थं स्वयमागतान् युष्मानपि प्रतिबं
स्थापयेत्. अथवा किमप्यनिष्टं कुर्यात्. इयं हि सर्पसमा यवनजातिः
कदाऽपि विप्रलब्धा विश्वसनीया. किंवा वलिष्ठयोरनायासेन हस्त
मागतयोर्युवयोरुभयोरपि अनिष्टं कुर्यात्. तस्मात् क्षमायाचनार्थं
भवद्भिर्न गन्तव्यमेव. स्वराज्योद्योगाच्च न विरमणीयं. श्वशुरचरणानां
प्राणास्तु युक्त्या रक्षणीया एव. अतःपरं दैवायत्तमिति. शिवराजस्त
स्वमनोरथानुरूपं स्वपत्न्या भाषणं निशम्य शान्तचित्तः सुखेन सुप्
प्रभाते मातरमभिवंद्य सर्वं वृत्तं निवेद्य कर्तव्यं पप्रच्छ. साऽपि
वीरपत्नी वीरमाता तथैव जगाद. मातरमपि स्वानुकूलाभिप्रायाम्
लोक्य निश्चितकर्तव्यः शिवराजो मध्यान्हे तस्य पत्रस्य प्रत्युत्तरं
लिलेख.

पूज्याः? पितृचरणाः? युष्माभिः प्रेषितं पत्रमवलोक्य नित
खिन्नोऽस्मि. तत्रापि यैः स्वीयं जन्म स्वसेवायामेव व्ययीकृतं
युष्माकं विषये विजापुराधीशस्येदृशी वृत्तिर्मेऽस्य तु सुतरां. स्व
लोकोत्तरं शौर्यं चातुर्यं च व्ययीकृत्य सेविता इमे यवनाः स
ईदृशं पारितोषिकं वितरन्तीति वीक्ष्यामिमा महाराष्ट्रियाला
यवनाधिपमनातो निवर्तेरन्. स्वराज्यस्थापनायां च मां साहाय्ये
यथा हि पूज्यानां पितृचरणानां युष्माकमाज्ञा प्रमाणं, तथैव गोत्राङ्ग

र्थं च तथा मातृभूमेश्च. एवंविधाः प्रसंगाः प्रतिदिनं यवनराज्ये
ज्जानामुपरि समापतन्ति. एतेषामेव निराकरणायाहं प्रयते. तत्र च
दीया वा पितृचरणानां वा प्राणा गमिष्यन्ति चेद्गच्छन्तु. यद्यपि
मापराधस्य कृते यूयं दण्डनीया इति विचित्रोऽयं न्यायस्तथापि
वनानां राज्ये न्यायस्यैवाभावादिदमेव युक्तं. तस्मान्मातृभूमेर्गो-
ाह्मणादीनां च तथा भाविन आर्यसंतानस्य च शुभाकांक्षी अहं
स्वराज्यस्थापनोद्यमान विरमामि. इदं पत्रं स्वस्वामिने प्रदर्शयात्मा
क्षणीयः अन्यथा सर्वमेव भाग्यायत्तम्, इति.

वाचकाः ? किमेतत् पत्रमेव श्रीशिवराजस्यानुपमां मातृभूमि-
ीतिं न दर्शयति ? यत्र च सर्वथा पूज्यानां पितृपादानां जीवनाशंका?
ामपि स्वीकृत्य स्वमातृभूमेः स्वातंत्र्यार्थं योऽविरतं प्रायतत तस्य
शिवराजस्य स्वमातृभूमिप्रीतिः कथं वर्णनीया. बान्धवाः ? अद्य
स्वद्यापि श्रीशिवराजस्य पवित्रं नामधेयं श्रुत्वा प्रमोदते मनः.
आदरार्द्रं च चेतो भवति. अस्तु.

(३)

श्रीशहाजीराजाश्चेदं पत्रं स्वस्वामिने विजापुराधीशाय प्राद-
र्शयत्, अवदंश्च-स्वामिन् ? यथा पुरा मयोक्तं तथैव सर्वं वृत्तं
वेत्ति स्वामी स्वयं विचारयत्विति. स च प्रकृत्यैव कपटी यवनः

सर्वमेवेदं कृत्रिमं मन्यमानः सकोपं प्रत्युवाच–राजन्? सर्वं युष्माकं वर्तनं कृत्रिमं. निःसंशयं शिवराजस्य निभृतं साहाय्यकारि यूयमेव. कथमन्यथा स्वामिकोपपात्रीभूतान् शिवराज उपेक्षे तस्मादद्य कारागारे युष्मान्निक्षिपामि. परन्तु यदि शीघ्रमेव स्वसु समागत्य क्षमां न याचिष्यति तदा निर्वातं तत्कारागारं विधाय यमागारातिथिं करिष्यामीति. उक्त्वा चेत्थं स दुरात्मा यवनाधि स्वसेवकांस्तान् शहाजिराजान् कारागारं नेतुमाज्ञापयामास. ते स्वभाग्यानि निन्दन्तो यवनसेवाप्रायश्चितमेवेदं शासनं मन्यमा महता धैर्येण तैः सेवकैः समं कारागारं प्रति जग्मुः.

वाचकाः? नीचभूपालसेवाया इदं फलमिति सर्वैरवगन्तव्यं. यथा हि बुभुक्षितो मांसिको मञ्जुलशब्दकारिणीं मनोहररूपां सारिकां लीलया निहत्य तन्मांसं भुंक्ते तथैव नीचाः सर्वथा परमस्वामि भक्त्या सेविताअपि काले प्रतीपा एव जायन्ते. सर्पश्च महता प्रेम्णा सेवितः. प्रातीदिनं पायितदुग्धोऽपि समये दशनेन प्राणानेव हरति सैव रीतिर्नीचानां. तस्मात् कः सेवनीय इति विचार्य सेवकैः कश्च सेवनीय. वस्तुतस्तु अयं सेवकानामेव दोषः! ते हि यथा जात्यन्ध यत्रकुत्रचिद्व्रजन्तो गर्ते पतन्ति तथैव यं कमपि सेवमाना दुःख विरेकं प्राप्य शोचन्ति. नीचानां तु नायं दोषः. यतस्ते नीचा एव यथा वह्नेर्दहनं स्वभावस्तथा नीचानामपि परापकार एव. अतोऽस्मि देशा निवर्तनमेव वरं तथा नीचेभ्यो निवृत्तिरेव श्रेयस्करी न संगति

राजनीतिमनाचरणं विना नान्यच्छरणं. दुर्दैवेनैव यवनर्द्धा
स्पर्धापरिहारायोग्यबलानामभवीय इति यस्तु राजनीति-
चोत्तमबलशाली शिवाजी मध्यमवर्गे यन्त्रेव ततो निवर्तते. अस्मि
समये सर्वेऽपि आर्यराजा दुर्बला एव. बलाढ्येषु सर्वेषु यवनराजे
दिल्लीश्वर. सर्वमेव श्रेष्ठ.. स हि कृत्स्नमार्यावर्तं तथा द्विनाकयन्न
स्याद्वर्तमानान् भूविभागान् शासन् कोशेन सैन्येन च सर्वानतिरिच्य

स चास्मिन् समये दक्षिणापथवर्तीनि यवनराज्यानि आक्र
तुमिच्छति. तयदस्मिन् समये स सेवकभावं प्रकटीकृत्य पितृवर्त
प्राणरक्षणार्थं प्रार्थ्येत चेत्तदाऽवश्यमेव विजापुराधीशमस्मात्कुक
रकर्मणो व्युपरमार्थमाज्ञापयेत् यद्यपि विजापुराधिप आत्मानं स्वत
मन्यमानो दिल्लीश्वरं द्वेष्टि तथापि स मध्यमवर्गो दिल्लीश्वराद्बिभे
तावतैवास्माकं कार्यसिद्धिः स्यात्. वस्तुवस्तु स्वतंत्रराज्यस्थापन
प्रवृत्ता वयं न कस्यापि सेवकास्तथापि अस्मिन् समये विनयनत
त्यैव कार्यसिद्धिः कर्तव्येति. विचार्य चेत्थं स चतुरः शिवः
दिल्लीश्वरं पत्रद्वारेण स्वपितृचरणसंकटनिवारणार्थं विज्ञापयामास
तच्च पत्रं सारतो यथा. सर्वैश्वर्यसंपन्ना दिल्लीश्वराः! साम्प्र
यूयमेव भारतवर्षस्य कृत्स्नस्य स्वामिनः. इमे च विजापुराधिपप्रभृत
यवनाधिपा युष्मदधीना एव. अहं च युष्माकं सेवको मदीयं पैतृ
भूविभागं परिपालयन् सुखेन निवसामि. मदीये भूविभागे बहू
राजद्रोहिणो वीक्ष्य तच्छासनार्थं तथा युष्मच्छासनस्थिरीकरणार्थ

तीव दुर्लभः. अतएव श्रीशिवराजमद्वितीयमेव मन्यन्ते सर्वेऽपि विद्वांसः
अस्मिन् समये शिवराजेन न केवलं पितृचरणा एव मोचिताः किं
विजापुरराज्याच्चतुर्थांशग्रहणाज्ञाऽपि तेन लब्धा. अस्तु.

(५)

एवं सार्वभौमकल्पस्य दिल्लीश्वरस्य नियोगं लब्ध्वा दुःखाकुलेन
अगतिकतया शीघ्रमेव शहाजिराजांस्तस्मात्कारागारादिव यवनाधि
निष्कासयितुं स्वामात्यमाज्ञापयामास. सोऽपि सत्वरमेव तथा कृ
प्रकृतिकुटिलो विजापुराधीशोऽन्तर्द्वेषेण ज्वलन् शहाजिराजान् स्वरा
धान्यामेव स्थातुमाज्ञापयत्. शहाजिराजाश्च ज्ञावयवनराजस्वरू
स्वदेशं गन्तुमत्युत्सुका आसंस्तथापि पुनरनिष्टाऽऽस्वशंकया त
वस्थुः. विजापुरस्थानि श्रीशहाजिराजस्य मित्राणि तानपि
दण्डितानवलोक्य प्रथममेव दुःखाकुलानि पुत्रचातुर्येण मुक्तान्
स्वदेशं गमयितुं प्रायतन्त.

अत्रान्तरे कर्णाटकविभागे राजद्रोहः समुद्भवत्. स च द
नल इव वेगेन प्रसरन् सर्वमपि विजापुरराज्यं बाधितुं प्रारभत. त
भीतो विजापुराधीशस्तस्य शान्तये स्वसामन्तानपृच्छत्. ते च त
शान्तये श्रीशहाजिराजा एव समर्था नान्य इत्यवदन्. अगत्या
सोऽनिच्छन्नपि कर्णाटकविभागं गन्तुं श्रीशहाजीराजाननुज्ञा

पितृसंकटं शिवराजश्चत्वारि वर्षाणि तूष्णींस्थित्वा गमयामास. अन्यथा पुनरुद्वेजितो विजापुराधिपस्तातचरणान् पीडयेदिति. अथ च स्वस्वीकृतसेवकभावः स दिल्लीश्वरराज्येऽपि न किंचित्कर्तुं पारयामास. एतेषु चतुर्षु वर्षेषु शिवराजः संपादितमेव भूविभागं सम्यग्व्यवस्थापयांचक्रे. विजापुराधीशोऽपि शिवराजं शौर्यचातुर्यसमन्वितं समवलोक्य भीतो नाकलहायत.



विज्ञप्तिं नांगीचकार. शिवराजश्च तेन निभृतं कुपितः सर्वे य
समाना इति दृढं मनसि कुर्वाणो यथेच्छं 'जुन्नर, अहंमदनग
नामनी नगरे दिल्लीश्वरराज्यान्तर्गते विलुण्ठ्य विपुलां सम्पदमाद
विजापुराधिपराज्यान्तर्गतं महाविभागमाक्रम्य प्रभूतं धनमाद
स्वसेनां वर्धयामास. अत्रान्तरेऽकस्माद्विजापुराधीशो दिल्लीश
समं संधिमकरोत्. तेन शिवराजः पुनरपि विनयमवलंब्य दिल्लीश
स्वापराधक्षमार्थमयाचत. सोऽपि आर्यावर्ते समुपस्थितं राज
शमयितुं त्वरया गच्छन्न चकार मनसि शिवराजकर्माणि.

दिल्लीश्वरमार्यावर्तव्यवस्थामग्नमवलोक्य विजापुराधीशः प्र
शिवराजमुन्मूलयितुं मनो विदधे. यतो दिल्लीश्वरः शिवाजि
समं मिलित्वा मदीयं राज्यं लीलया स्वायत्तीकरिष्यतीति स श
संदिग्धे.

अथास्मिन् कर्मणि बाजिशामराजनामा कश्चन राजपुत्
विजापुराधीशेन नियुक्तो निभृतं शिवराजं बन्दीकर्तुमिच्छन् च
रावमोरेनाम्ना जावळीविभागस्वामिना विजापुराधीशसामन्तेन स
संमंत्र्य तस्मिन् प्रदेशे कृतवसतिः शिवराजागमनं प्रतिपालयामास
वद्धानीं शिवराजो महाडविभाग आसीत्. स चेमं वृत्तान्तं सर्वत्र
संचरतां स्वचाराणां मुखान्निशम्याऽकस्मात् स्वयमेवागत्य तं बाजि
शामराजं श्येनः शशमिव समाक्रम्य जिगाय. स तु यथापराभू
कथमपि स्वप्राणान् गृहीत्वा राजधानीं ययौ.

एवमेवान्यो वांदलनामा देशमुख आत्मानं विजापुराधिरं
मन्यमानः शिवराजायाद्रुह्यत्. तमपि अनेनैव विधिना नानं
विधाय प्रकटीकृतालौकिकस्वामिभक्तिं नररत्नं वीरशिरोमणिं प्र
कुलभूषणं तदीयममात्यं वाजिप्रभुं स्ववशं व्यधात्. इत्थं इ
कोंकणविभागं स्ववशं विधाय बलं वर्धयामास.

(२)

विजापुराधीशश्च क्रमेण प्रबलीभवन्तं शिवराजमाकर्ण्य विन
तुरस्तस्य शासने कृत्स्नं स्वबलमुपयोक्तुं कृतनिश्चयो महतीं सदर
न्तानां सभामकरोत्. मुख्यस्य सिंहासनाधीश्वरस्य बालत्वेन तद
मातैव कृत्स्नं राज्यकार्यमपश्यत्. सा तु शिवराजस्य प्रतापव
श्रुत्वा नितान्त क्रुद्धा सर्पिणीव सर्वान् राजपुरुषानुद्दिश्येदमभ
सभ्याः ? राजपुरुषा: ? स राजद्रोही शहाजिराजस्य
शिवाजिः स्ववंशपरंपराप्राप्तां राज्यनिष्ठां त्यक्त्वाऽहर्निशं ए
स्माकं पीडयति. स्वपितरमपि न मन्यते. अस्माभिश्च प्रे
सेनापतीन् विजित्य साम्प्रतं बलिष्ठ. संवृत्तोऽस्मत्प्रजा लु
अधुना च नमुपेक्षानर्हं मन्यमाना वय तं नामशेषं विधातुमि
मः. तत् को वा तं जीवमाहं गृहीत्वा वा हत्वा वा राज्य
दूरीकर्तुमिच्छति? अहं च सर्वथा तं साहाय्यविष्यामीति.

समाकर्ण्य चेदं कोपपरायत्तमानसाया राजमातुः कठोर भा
सर्वे वत्रत्या राजपुरुषाः शूराअपि शिवराजप्रतापश्रवणभीता नोद

प्राभवंस्त एव नूतनं स्वराज्यं स्थापयित्वा तत् सम्यग्वर्धयिष्यन्ति का प्रत्याशा. परमात्मकृपयाऽद्यपर्यन्तं यवना एव प्रबला अतस्तेषामेव साम्राज्यं यावच्चन्द्रदिवाकरं स्थास्यति. शिवराजसदृशाः कतिपये क्षुद्राः साम्राज्यद्रोहाभिमुपासमाना अवश्य मज्जन्ति लप्स्यन्ते. यद्यदि मामाज्ञापयसि तदाऽनायासेन तं पर्वतवासिनमाखु बिडाल इव जीवन्तं गृहीत्वाऽत्रानेष्यामि. इति.

राजमाता तथा सर्वे महंमदीया राजपुरुषा अनेन स भाषणेनोत्साहमयेन सन्तुष्टास्तमस्तुवन्. महाराष्ट्रीयाश्चानेनापमाने नान्तर्ज्वलन्तोऽग्निगर्भाः पर्वता इव तूष्णीमतिष्ठन्.अथ राजमा राजहस्तेन तमफजुलखानं वलिपशुमिव रत्नादिभिः सन्मानयन् द्वादशसहस्रसंख्याकमाश्विकबलं प्रभूतं पदातिबलं महतीः तथा गजबलमुष्ट्रबलं च वितीर्य धनराशिपूर्णान् कोशानपि दत्वा गजशासनाय गन्तुमन्वमोदत. स तु दुर्मदो यवनोऽनेन सत्कारातिरे नात्मानं धन्यंमन्यमानः समानीतमेव शिवराजं भावयन् महतोत्साहे विजापुरनगरात् प्रतस्थे. यद्यपि विजापुराधीशः प्रायो यवनमयं सैन्य प्रचुरमदात्तथापि स भूयो महाराष्ट्रीयसैनिकानां सहस्रद्वयं स्वसैन्ये स्थापयामास. मेने च महाराष्ट्रीयैः समं योद्धुं महाराष्ट्रीया एव वर्मिति. परन्तु द्रव्येण क्रीतानां तथा स्वयं स्वधर्माभिमानेन समागतानां सैनिकानां महदन्तरं न मनागपि पश्यत् असौ.

अथ निवृत्ते मध्यरात्रे सर्वेषु जनेषु सुप्तेषु शिवराज एकाकी त दूतस्य निवासगृहं गत्वा विनयेन भक्त्या च जगाद-विप्रेन्द्र मया खलु इदं कार्यं स्वदेशस्य तथाऽसमर्थानां दीनानां रक्ष प्रारब्धं. इमे च यवनाः कृत्स्नं भारतवर्षमाक्रम्य यथेच्छं वर्तमान नः सर्वानपि पीडयन्ति. देवालयानि च नाशयन्ति. तत् सर्वै रपि संभूयेयं सनातनधर्मपीडा दूरीकरणीया. वयं च क्षत्रिय बाहुबलसहायाः. सर्वेषु वर्णेषु द्विजा एव श्रेष्ठाः. तेषां मतमेतत् सर्वेऽपि अनुसरन्ति. यदि सनातनधर्मप्रीतिरियच मातृभूमिनिष्ठ स्त्वाशिष्टा स्यात्तदा किमपेक्षते यवनसेनापतिरिति सत्यं वक्तव्यमिति सोऽपि दूतो जात्या ब्राह्मणः शिवराजस्य लोकोत्तरं भाषणं निशम्य सन्तुष्टः स्पष्टमेव 'स यवनसेनापतिर्युष्मान् बन्दीकृत्य नेतुमिच्छ तीति' सत्यं तदाशयं जगाद. ततस्तेन समं संमंत्र्य शिवराजः ' यवनसेनापतिरत्रैवानेयः. यदि स पापमाचरेत्तदा वयमपि त करिष्याम ' इति निरणयत्. निर्णीय चेत्थं तं दूतं गोपीनाथनाम स्वदूतेन समं विसर्जयामास.

स तु कृष्णाजीभास्करो यवनसेनापतिमवदत्. युष्मत्प्रताप श्रवणेन भीतः शिवराजः प्रतापगडदुर्गात् कथमपि बहिर्निर्गन्तु नैच्छत्. मया भूयोभूयो बोधितः कथमपि युष्मान् द्रष्टुं धैर्यमालंबत शिवराजश्च सत्यमेव बिभेति युष्मत्कृपां याचते च. तत्तदनुरोधेन संमेलनस्थानं निर्णेयमिति. अफझुलखानश्च स्वदूतस्येदं भाषण

तानाकर्ण्य मुख्यामात्येन जावळीविभागमागता यवनसेना नाशनीय सर्वैरपि सावधानेन वर्तनीयमिति.

इत्थं यहिर्व्यवस्थाप्य प्रतापगडदुर्गे सर्वान् स्वसहायानेकत्रीकृ जगाद–अस्माभिश्चेदृश उद्योगः प्रारब्धः. सनातनधर्मस्योद्धारो वि रक्षा पतिव्रतानां शीलरक्षणमेवास्माकमुद्देश्यम्. तद्यदि अहमेतत्क कुर्वन्नेव प्राणांस्त्यक्ष्यामि तदा स्वर्गप्राप्तिर्निश्चितैव. परन्तु भवद्भिर्यथा च्छक्ति समारब्धमिदं कार्यं समापनीयमेव. यदि दुर्दैवतोऽस्मिन् संमेलनेऽन्यथा भविष्यति तदा युष्माभिर्धैर्यमवलंब्य मातरं जिजाबाई प्रमाणीकृत्य स्वराज्यवृद्धिः करणीयेति. इदं च शिवराजस्याकस्मि निर्वाणकालिकमिव भाषणमाकर्ण्य सर्वेऽपि स्वामिभक्ताः सेवकाः प दुःखाकुलाः स्वराज्यवृध्यर्थं शपथमकार्षुः.

अथ नियते दिने सर्वानपि स्वामिभक्तान् महाराष्ट्रीयांस्त रयन्निव स्वकुलभूषणस्य महाराजशिवनृपतेः पराक्रमं द्रष्टुमिच्छन्निव भगवान् भास्कर उदयाचलशिखरमारुरोह. तदानीमेव सर्वे मावळे सैनिका स्वस्वशस्त्राणि धारयन्तः स्वाधिपैः समं नियतं स्थलमलेचकु- प्रतापगडदुर्गमभितो वर्तमानं तुहिनं शिवराजपक्षानुकूलमिव सर्वानपि तान् गोपयित्वाऽभीष्टं स्थलं प्रापयत्. शिवराजोऽपि ज्ञातसकलवृत्तो महति प्रभाते उत्थाय शान्तचित्तेन भगवतीं संपूज्य तद्दत्तं पुष्पहार यशस्तोममिव शिरसा समुद्वहन् वस्त्राणि परिधत्तेस्म. स च प्रथमतः

तावतोऽपि सैनिकान्विन्नकारिणो मन्वानः 'प्रथमत एव भीतः शिवरा
समागतानेतावतः सैनिकान् पश्येत्तदा संमीलितुं नागच्छेत्. तया
युष्माकं मनोरथः सफलो न भवेत्. यदिमान् सैनिकान् मार्गे
स्थापयित्वा केवलमेकाकिना स्वामिना तत्रोपस्थातव्यं. प्रकृत्यैव बल
ढ्यस्य करीन्द्रबलशालिनो भवतः पुरस्तादल्पबलः शिवरा
कियती मात्रा ? इति. सोऽपि कालापहृतबुद्धिः सर्वं तदीयं वच
सत्यं मत्वा तथाकुर्वन् केवलमेकेनैव सेवकेनान्वितः सभामण्ड
प्राविशत्.

अथ प्रतिपालयति युष्मदागमनं यवनसेनापतिरिति कृष्णाजि
भास्करेण प्रेषिते संदेशे शिवराजः परमस्वामिभक्तैः सेवकैः स
बलिपशुहननाय दीक्षित इव शिबिकामारुह्य प्रतापगडदुर्गाच्छ
शनैरवतीर्य सभामण्डपमाययौ. अचिरादेव शिवराजं समागतमवे
क्ष्याफझुलखान उत्थाय तस्थौ. शिवराजोऽपि भीतभीव इ
नम्रीभूय शनैः शनैरागच्छत्. तद्वीक्ष्य कृष्णाजिभास्करः 'प्रथम
मेव युष्मत्प्रतापानाकर्ण्य भीतः शिवराज इदं तादृशप्रतापयोग्य
शरीरं युष्माकं वीक्ष्य बिभेति. तदस्य विश्वासदानाय सेवकोऽपि
दूरीकरणीयः' इति शनैरवदत्. सोऽपि कपटमतिः शिवराजं दुर्बल
मन्वानस्तथाकृत्वा पुरोभूय शिवराजमालिङ्गितुं बाहू प्रसार्य वदन
प्रविष्टं शिवराजं स्वकक्षे धृत्वाऽपरेण हस्तेन निस्त्रिंशप्रहारमकरोत्.

नामाक्रम्य नामशेषां व्यधात्. ततश्च क्रमेण जायमानान् पंच शतघ्नी ध्वनीन् श्रुत्वा सानन्दः प्रधानामात्यः सिंहो हरिणयूथमिवान्यवस्थि यवनसैन्यमाक्रम्य कांदिशीकं चक्रे. इत्थं विजयश्रियं लब्ध्वा कृतकृत्य शिवराजः प्रथमं भगवतीं भवानीं नमस्कृत्य तस्याः पादकमलयो स्तद्रुण्डमर्पयामास. ततो मातरं वन्दितुं जगाम. माता जिजाबाई स्वपुत्रं विजयशालिनं भगवतीप्रसादात् पुनर्लब्धं मन्यमाना तमालिङ्ग्य मूर्ध्नि समाघ्राय 'वत्स! शिवराज! अद्य सत्यमेव त्वयाऽहं वीरमाता कृता. यदाऽयं यवनः कपटेन त्वदीयं ज्येष्ठं भ्रातरमवधीत् तदाऽहं पुत्रशोकविव्हला अस्य नाशार्थं देवीं प्रार्थये. तां प्रार्थनां भगवत्यद्य सफलयामासेति वदन्ती सर्वान् सेवकान् प्रशशंस.

शिवराजश्च ततो निर्गतः स्वसैनिकानां दर्शनार्थमधस्तादायये. तत्र गत्वा ये शस्त्राघातविव्हला आसंस्तान् सांत्ववचनैः संतोषयामास. ये खलु रणेऽमानुषं कर्म चक्रुस्तेभ्यो योग्यानि पारितोषिकाणि वितार. येऽपि यवनसैनिकास्तानपि आदृत्य स्वसेवोत्सुकान् स्वसेनायामस्थापयत्. अन्यांश्च स्वस्वस्थानं प्रति प्रेषयामास.

वाचकाः ? शिवराजो यथा कृतज्ञ आसीत्तथैव कृतघ्नान् प्रति चण्डदण्डोऽपि. उचितमेवैतत्. अन्यथा राज्ये व्यवस्था न स्यात्. अस्मिन्नेव प्रसंगे खंडोजीकांकडेनामा कश्चन स्वदेशद्रोही रणे शस्त्राघातविव्हल फाजलखाननामानमफझुलखानस्य पुत्रं निभृतं गोपयित्वा

स्वराजनगरं प्रापयामास. लेभे च तस्मात् प्रभूतं धनं. गजेन्द्रांश्च निहत्य संततः श्रीशिवराजस्य विश्वासघातकं वशीकृत्य तस्य शिर-श्छिच्छेद. एतेन भीताः सेवकाः स्वस्वकर्माणि स्वामिभक्त्याऽकार्षुः. अस्मिन् युद्धे शिवराजः प्रभूतं गजबलं तथाऽश्वान् शस्त्रास्त्रसमूहं कोशांश्च लेभे.

३

तस्मिन् स्वसेनापतेः पराजयं तथा निधनं सर्वसैन्यानाञ्च क्षय-माकर्ण्य सा राजमाता सह स्वपुत्रेण शोकसागरमग्ना दिनत्रयमन्नं न जग्राह. सर्वेऽपि यवना इमं वृत्तान्तमाकर्ण्य स्वराज्यस्य प्रलय-कालं समीपमागतं मेनिरे. तदानीमेव शिवराजः पन्हाळानामकं पर्वतस्य दुर्गं स्वायत्तीचकार. इमां वार्तां श्रुत्वा चिन्तातुरो विजापु-राधीशो रुस्तुमजमाननामानं निजसामन्तमभ्यर्थ्य तन्नाशनायाज्ञापया-मास. स च कथञ्चित्स्वामिकोपभीत्या समागतः परं शिवराजो धीरतया पराजित्य तत्सैन्यानुधावनमिषेण विजापुरनगरपर्यन्तं सर्वमपि प्रदेशं लुलुण्ठ.

इत्थं प्रबलीभवन्तं शिवराजमवेक्ष्य चिन्तातुरो विजापुराधीशः कर्तव्यमूढोऽजायत. अथान्तरे सिद्दीजोहारनामा कश्चन तदीयः सेवकः स्वमित्रमुखेन शिवराजशासनार्थं गन्तुं मनीषां दर्शयामास. अयं च सिद्दीजोहारः परं दुर्दान्तो विजापुराधीशाज्ञामपि ना

तेन विजापुराधीशो रुष्ट एवासीत्. इमां तदीयामभ्यनुज्ञामनु
महताऽऽदरेण तं राजसभामाहूय सत्कृत्य च शिवराजविज
विसर्जयामास. तेन सममफजुलखानस्य पुत्रः पितृवधकुपितस
शिवराजस्य शासनार्थं ययौ. इमां च वार्तां चतुरचारगणनिवेदि
माकर्ण्य शिवराजः सावधानो भूत्वाऽस्या आपदः परिहारार्थं प्रायत
प्रथमत. सर्वाणि दुर्गाणि अन्नसामग्रीपरिपूर्णानि विधाय कृत्स्न
राज्यस्य रक्षणार्थं स्थाने स्थाने शूरान् सेनापतीन् स्थापयित्वा स्व
दुर्गराजे पन्हाळादुर्गेऽतिष्ठत्. तौ यवनसेनानायकौ शिवरा
पन्हाळादुर्गस्थमाकर्ण्य तद्दुर्गं रोद्धुं त्वरया समागच्छताम्, शिद्दि
जोहारश्च महता चातुर्येण तत्कृत्स्नमपि दुर्गं निरुध्य निरुद्ध
समकरोत्.

एवं निरुद्धे गमनागमने व्यतीतेषु चतुर्षु मासेषु श्रीशिवराजो
यद्दिर्वर्तिनां स्वकीयानां वृत्तमजानन् महति संकटे निपतितमात्मानं
मेने. तदधिकारिणोऽपि स्वस्वामिवृत्तमविज्ञाय संभ्रान्ता अभवन्.
एवं गच्छति काले शिवराज एवमेकत्रावस्थानमनुचितमिति भावयन्
पुनरपि राजनीतिमुपयोक्तुं मतिं चक्रे. ततः स तेन सेनापतिना
समं संधवितुं स्वदूतं प्रैषयत्. विज्ञापयामास च तन्मुखेन-अ
यात्र सर्वथा युष्माभिर्वशीकृतः. मदीयं वृत्तं न मदीया अधिकारिण
जानन्ति नाप्यहं तेषां. तत् साम्प्रतं संधिं कर्तुमिच्छामि. यद्यत्र

परन्तु भीष्मपराक्रमः स बाजीप्रभुरल्पीयसा सैन्येन सर्वान् बलम
दृप्तान् शत्रुसेनापतीन् पराङ्मुखान् चक्रे. अत्रान्तरे मर्गोः माहात्म
शतघ्नीविभागोऽपि समाययौ. ततः शतघ्नीगोलकेषु वेगेन निरन्त
सत्सु बाजीप्रभोः सैनिकाः क्रमेणाक्षीयन्त. प्रतिपक्षं क्षीयमाननैनि
कमवलोक्य शिद्धीजोहारो महता धैर्येण समाचक्राम, परन्तु स
नरव्याघ्रो बाजीप्रभुस्तथैव युध्यमानो न मुमोच मार्गं.

अस्मिन्नवसरे शत्रुपक्षादागतेन शतघ्नीगोलकेन छिन्नांगो विह्व
भूत्वा स समरभूमौ पपात. परन्तु तस्यान्तःकरणं भविष्यत्सु शतघ्नी
ध्वनिषु लग्नमासीत्. इतो निर्गतस्य स्वामिनस्तिस्रो घटिकाः संवृत्ताः
अद्यापि स्वामिचरणाः कुतो न विशाळगडदुर्गं गताः? मार्गेऽन्यद्विघ्ना
न्तरं प्रादुरभवद्वा ? भगवन् ? मदीयप्राणनिर्गमनात् पूर्वं शतघ्नीध्वनि
श्रावयित्वा मां कृतार्थं कुरु ! इति चिन्तयति तस्मिन् देशभक्ते
स्वामिभक्तसेवकमुकुटमणौ बाजीप्रभौ विशाळगडदुर्गात् पंच श
घ्नीध्वनयोऽजायन्त. तान् कर्णेकृत्वा सन्तुष्टः स बाजिप्रभुर्मनसैः
स्वामिचरणान्नमस्कृत्य 'कृतं मया कर्तव्यं, इत्यक्षराण्युच्चार्य प्राणान
व्यसृजत्

वाचकाः? ये खलु जगतीतले शूरा वीरा जातास्तेषु सर्वेषु
बाजीप्रभुः प्रथम इति सर्वेऽपि इतिहासविदो वदन्ति. केवलं स्वामि
प्राणरक्षार्थं स्वप्राणा येन तृणीकृताः स कथमिव स्तुत्यो न. नह

(४)

विजापुराधीशश्च तं रिक्तहस्तं अपितसैन्यं शिवराजराज्या प्रत्यागतं शिद्दीजोहारमेवेक्ष्य कोपसंतप्तः सभागमननिषेधनापमानि तं व्यधात्. स च यवनाधिपस्वभावं सम्यग्जानन् वनदुर्गे कर्नाट विभागं ययौ. ततो विजापुराधीश्वरः प्रतिदिनं शिवराजाक्रमणान्यव मानः स्वयमेव गत्वा शिवराजं शासितुमियेष. शिवराजशासनार्थं निर्गतं विजापुराधीशमवगम्यान्ये सर्वेऽपि तदाश्रिताः सामन्ताः स्वस्व सैन्यान्यादाय तममीलन्. तेन यवनसेना महती बभूव. विजापुरा धिपश्च स्वसेनां सन्नद्धामालोक्य विलंबे शिवाजिः सावधानः स्यादिति मन्वानः सहसा निर्गतः शिवराजराज्यं प्रविश्य सर्वाणि दुर्गाणि स्वायत्तानि चक्रे. पन्हाळादुर्गमपि विजिग्ये. केवलं रांगणाविशाळ गडदुर्गे एव न जिगाय. शिवराजश्च विजापुरस्वामी दुर्गाणां ग्रहणेन क्षीणबलः सुजेयो भवेदथ च तस्मिन् स्वदेशं गते पुनरपीमानि दुर्गाण्यस्माकमेवेति भावयन्न तं रुरोध.

अत्रान्तरे वर्षासमयः समाजगाम. तस्य च तस्मिन् पर्वतमये सतत संचरद्घनघटादृश्यमानमानवं, महता वेगेन प्रवहज्जलौघसहस्रानि प्रचण्डशिलासहस्रसावाधसंचारं, छिन्नसकलसामग्रीदुर्लभान्नं रवि ... घोरं स्वरूपमालोक्य भीतः स विजापुराधीशस्ततो निर्गत ...तीरे स्वसेनानिवेशं कल्पयित्वा तस्थौ. तदानीमेव स क...

संधिं विनाऽन्य उपायः शिवराजस्य वशीकरणे. यद्येवमेव विग्र प्रचलेत्तदा वर्धमानबलः सततं विजयश्रिया समलंकृतः शिवराजोऽल्प कं कृत्स्नं राज्यं स्वायत्तीकुर्यात्. संधिश्च यथा चिरस्थायी स्यात्तथा व श्रेयस्करो भवेत्. यद्यन्यः कश्चन मदीयोऽधिकारी संध्यर्थं गच्छेत्तर्हि स धूर्तः शिवाजिः संधिनियमान् स्वानुकूलानेव नानाविधच्छलैः कुर्यात्. तस्माद्यो हि अस्मद्राज्यस्याभिमानी स्याद्यं च तं शिवाजिर पि बहु मन्येत ईदृशः कश्चन शोधनीय इति. इत्थं विचिन्तयति विजापुराधिपे तदीया मंत्रिणः शहाजीराजमीदृशं दर्शयामासुः. विजा पुराधिपतिः शहाजिराजानाहूय संधिविधानार्थमयाचत. शहाजिराज अपि पराक्रमशालिनः स्वराज्यस्थापकस्य पुत्रस्य दर्शनार्थमुत्सुक इमां स्वामिप्रार्थनामंगीकृत्य निर्गताः क्रमेण तुळजापुरवासिनीं भगवतीं प्रणम्य पंढपुरस्थं श्रीविठ्ठलेशं नमस्कृत्य शिवराजं विलोकि पुण्यपत्तनमुद्दिश्यागच्छन्.

शिवराजोऽपि एतद्विदित्वा प्रमुदितः स्वागतसन्नाहं विधा 'पितृदर्शनं च जेजुरीक्षेत्रे देवालये भाव्यमिति' विद्वत्संमत्या तत्रै गत्वा पितृचरणान् साक्षात्कृत्य महता विनयेन मुकुलितहस्तकमलस्त स्थौ. शहाजिराजाअपि स्वतंत्रराज्यस्य स्थापकं गोब्राह्मणप्रतिपालकं स्वतनयमवेक्ष्य रोमांचितगात्रा हर्षप्रफुल्लनेत्रकमलाः सानन्दं विनया वनतं शिवराजं प्रसारिताभ्यां दोर्भ्यां समाश्लिष्योचुः–वत्स शिवराज!

अथ शहाजिराजा विजापुरनगरमागत्य सर्वं वृत्तं सा[illegible] निवेद्य तेनाऽपि सानन्दं सत्कृताः कर्णाटकविभागं गताः. अचिरे[illegible] मृगयां गता अश्वान्निपत्य परलोकमयुः. तेन शिवराजः परं दुःख[illegible] लोऽभवत्. जिजादेवी तु शोकभारं सोढुमशक्नुवाना सहगमन[illegible] शिवराजशोकाकुलानां मंत्रिणां विज्ञत्या महता दुःखेन तत्याज. शि[illegible] राजोऽपि ऐश्वर्यानुरूपं पितृकार्यं चक्रे.


वाचकाः ? यः केवलं स्वप्रतापमहिम्ना विजापुरसानन्दं स्वतंत्रो भूत्वा तस्मादेव राज्ञः समानं मानं लेभे स शिवराजो [illegible] स्वस्य माता जिजादेवी च धन्या. धन्याश्च ते शहाजिराजाः



नौकासु स्थापयित्वा महत्या त्वरया दुर्गं व्यरचयत्. तत्र दुर्गं त्रि
वर्षैः परिपूर्णं बभूव. तदानीं शिवराजो महतोत्सवेन स्वराजधान
सकाशान्निर्गतः सुमुहूर्ते तद्दुर्गं प्रविश्य ब्राह्मणान् भोजयित्वा सिं
दुर्गनाम्ना तदलंचक्रे. एवं 'अंजनवेलि,रत्नागिरि,पद्मदुर्ग,सराज्ञको
गहनदुर्ग,खांकरी,राजकोट,प्रभृतीनि जलदुर्गाणि निर्ममौ.

(३)

एवं नौकाबलं निर्माय समुद्रसंचारिभिः परकीयैः समं युध्य
मानः शिवराजस्तदीयानि नगराण्याक्रम्य यदा धनमहरत्तदा पुन
पुनर्युद्धप्रसंगा अजायन्त. तेषु च सेनाबलं सुतरामपेक्षतेस्म. पर
तिसेना च संग्रामस्य भूविभागस्य रक्षणाय पर्याप्ता न नौकासु
स्थित्वा योद्धुं प्राभवत् इदमालोच्य शिवराजो नूतनमेव नावि
बलं निर्ममौ तत्र च द्वादशसहस्रपरिमिताः सैनिका आसन्निति
प्राचीनेतिहासविदो वदन्ति. तदधिकारिणोऽपि स्थलसेनाधिकारिभ्यो
भिन्ना एव यथा हि स्थलसेनायां सेनापतयो बहवः शूरा मोरे
पन्तप्रभृतयोऽभवन्नथैव दर्यासारंग,इब्राहीमखान,मायनायकभंडारी
दौलतखाननामानः पुरुषश्रेष्ठा नाविकबलसेनापतिपदं भूषयामासु
ग्रामोऽभिनाविकबले कोळीभंडारिप्रमुखा एव जना आसन्. ते
नौकानां संचारे तथा जलयुद्धे च प्रवीणाः सर्वानपि शिवराजशत्रू
मंत्रपालकुर्वन्



(१२ दिल्लीपतिना सह वैरोद्भवः संग्रामाश्च

१ दिल्लीपतिना वैरस्य कारणं.
२ शास्ताखानस्य शासनम्.
३ सुरतप्रभृतीनां नगराणामाक्रमणं.
४ जयपुराधिपतिना सह सख्यम्.
५ संधिः तेन सह विजापुरराज्याक्रमणं.

(१)

इत्थं नाविकपदातिबलाभ्यां परिपूर्णः शिवराजः सर्वां राज्यव्यवस्थां विधाय पुनरपि स्वराज्यमर्यादां वर्धयितुमिच्छुर्विजापुराधिपतिना कृतसंधिर्दिल्लीश्वरराज्यविभागमाक्रमितुमियेष. परन्तु किमपि विशेषकारणमपश्यंस्तूष्णीं तस्थौ. अचिरादेव तदपि बभूव. तद्यथा,

शिवराजसमये दिल्लीश्वरो मोंगलवंश्यः शहाजहाननामा यवन आसीत्. तस्य च चत्वारः पुत्रा दाराशुजामुरादअवरंगजेबनामानः तेन राज्ञा तत्र तत्र महति पदे नियुक्ता धनाढ्या आसन्. तेषु सर्वेषु अवरंगजेबः तस्तु महाकपटी धूर्तः शृगाल इव राजनीतिविशुा

वायमपि पराजेयः. अहं च त्वां यशस्विनं करिष्यामि इति. त
भगवत्या निदेशं प्राप्य शिवराजः परं संतुष्ट आत्मानं कृतकृ
मेव मेने.

अथ दूतमुखाच्छ्रुतसकलवृत्तः शिवराजोऽकस्मादाक्रमणेन प
जेतुं तमशक्यं मन्वानो राजनीत्या वर्तितुं प्रारभत. स च प्रथमतो
विप्रौ प्रेषयि [illegible]
अकथयच्च [illegible]
दनीयमिति. तेन च तथांगीकृते तौ द्विजवरौ समागत्य सर्वं
महाराजाय निवेदयामासतुः. महाभागः शिवराजः कालातिपातेन
कार्यहानिमुत्प्रेक्षमाणस्तस्मिन्नेव दिने रात्रौ घनान्धकारसमावृते
भूतले सिंहगडदुर्गात् सैनिकसहस्रेण समं निर्गतो मार्गे स्थाने स्थाने
वर्तमानेषु विशालवृक्षेषु तैलसिक्तान् कर्पटान् बन्धयित्वा
वाद्यपूरकानस्थापयत् आदिशच्च तान् यदा सिंहगडदुर्गगामिनि म
विजयस्य सूचक शृगध्वनिर्भविष्यति तदा युष्माभिरिमे कर्पटाः
लनीया स्वस्ववाद्यानि वादयद्भिः स्वस्वस्थान प्रति गन्तव्यमिति.
सर्वं व्यवस्थाप्य सर्वत्र स्वाभिमुखान् स्वसेवकान्निधाय कृतमा
[illegible]
[illegible]
स्तद्वशानुगामिनी विवाहमण्डपी प्रवेशद्वारसमीपमाजगाम. तां पद

माना अनुधावन्तो निबद्धान् तैलकर्पटान् वीक्ष्य खिन्ना यावन्निव
तावत् स्वानुयायिभिः समं शिवराजो निर्विघ्नं सिंहगडदुर्गमाजगाम

अथ समुदिते भगवति भास्करे रात्रिवृत्तान्तश्रवणेन कुपि
तयवनसैन्यं महता संरंभेण सिंहगडदुर्गं रोद्धुमागतं प्रथमतस्तूष्
स्थितः शिवराजः शतघ्नीगोलकैस्तथाऽताडयत् यथा मुवगडुलसैनि
तच्छीघ्रमेव कांदिशीकं बभूव. शास्ताखानश्च स्वसैन्यस्येमां दुर्दशाम
वेक्ष्य परं खिन्नः सिंहगडदुर्गमपि रोद्धुं नाशकत्. स हि मने
अहमित्थं सावधानेन वर्तमानोऽपि कपटिना शिवराजेन पराजि
स्वन्मदीये सैन्य एव कश्चनाधिकारी कृतघ्नः संवृत्त इति. तं
जसवंतसिंहमेव निश्चित्य सर्वं पराजयवृत्तं दिल्लीश्वराय निवेदयामास.
सोऽपि स्वसैन्यस्य पराजयं स्वमातुलस्य कपटेन शासनं जसवं
सिंहस्य कृतघ्नतां निशम्य कुपितो रात्रिंदिवं समतप्यत्. स प र
त्मानमेव कपटकुशलं मन्यमानः शिवराजस्येदं चातुर्यमालोक्य नि
न्तमखिद्यत. स्वयमेव समागत्य शिवराजं शासितुं वयांच्छ, परं
काश्मीरविभागे राजद्रोहस्य प्रादुर्भावाच्च तथाऽकरोत्. ततश्च मातु
शास्ताखानं दक्षिणापथाधिकारिपदेऽयोग्यं विभाव्य तं बंगदेशाधि
कारिपदे नियुज्य स्वपुत्रमत्र न्ययुंक्त.

धनराशिः स्वराजधानीमाययौ. अस्मिन्नाक्रमणे शिवराजो निष्क
मष्टकोटीर्लेभे. तदीयः सेनापतिर्नेताजिपालकरो नानाप्रदेशान्निर्
प्रभूतं धनं लब्ध्वा वर्षासमये पुण्यपत्तनमाययौ. नौकाबलाधिपतिर
शत्रूणां नौका आक्रम्य द्रव्यमहरत्. तदानीमेव समुद्रतीरवर्ति वि
पुरराज्यान्तर्गतं बार्सिलोरनामकं नगरं संपन्नमाकर्ण्यानलसः शिवरा
सिंधुदुर्गं गतस्तत एव सर्वं नौकाबलमादाय तन्नगरं लुलुण्ठ. कृत्स
मपि कारवारनगरपर्यन्तं भूप्रदेशं स्वायत्तीकृत्य भूमिमार्गेण सैन
प्रेषयित्वा स्वयं शीघ्रं गन्तुमिच्छया जलमार्गेण प्रावसत्. सा
प्रतिकूलवातप्रेरिता नौका शनैः शनैः संचरन्ती बहुना समयेन
धानीमाययौ. अस्मिन् समये जलप्रवासस्य पराधीनत्वं प्रेक्ष्य शिव
जरत्वं सर्वथा हातुं निरणयत्.

(४)

एवं सर्वतः प्रभूतं धनं लब्ध्वा स्वराजधानीमागतः शिव
स्वमातुलस्य शास्तास्तानस्य पराभवेन कुपितो दिल्लीश्वरः पुन
शिवराजराज्याक्रमणाय कृतनिश्चयोऽतिपराक्रमिणौ, अगणितसेना
समन्वितौ, अपारकोशभारमण्डितौ जयसिंहदिलेरखाननामानौ द्वौ
पती प्रेषयामासेति वृत्तमशृणोत्. तत्र जयसिंहो हि परमशूरो रजपू
श्रियः प्रसिद्धस्य जयपुरराज्यस्य स्वामी महान् पण्डितः सम्
सरत्रः प्रधानमेव आसीत्. दिलेरखानस्तु यवनत्वेन दिल्लीश्व

अथ जयसिंहोऽपि प्रकृत्या कुलीनः सनातनधर्माभिमानी दुर्वृ-
त्तो धृतयवनसेवोऽपि सहृदयो महाराजं स्वराज्यस्थापनार्थं प्रयतमानं

दुर्गाण्यवलोक्य मनस्यकरोत्—अहो ? एतेषां दुर्गाणां दुर्गत्वं. एतानि
शक्रेणाऽपि जेतुमशक्यानि. अहं चाजन्मनो युध्यमानः कदापि परा-
जयमलिनमुखो नाभवम्. यदि चास्मिन् समये यशोभाङ् न भवि-
ष्यामि तदा महत्कष्टं. तस्माद्यदि संधिं विधाय शिवराजविजययशो
लभ्यते तदा वरमिति. अस्तु. तत्र पत्रमित्थं—महाभाग ? शिवनृपते !
अयं दिल्लीश्वरोऽवरंगजेबोऽधुना महाप्रतापी सकलानपि राज्ञ ऐश्वर्ये-
णातीत्य वर्तते. कृत्स्नमार्यावर्तं तदधीनं. नैतावदेव किंतु अफगाणि-
स्थानप्रभृतय आर्यावर्तस्य बहिर्भूता अपि देशास्तस्य वशंगताः. अत
एव त्वया तेन समं विरोधो न करणीयः. दुर्बलेन बलवतो विरोधो न
करणीय इति खलु राजनीतिः. तस्मात् सर्वानपराधान् स्वीकृत्य
संधिरेव विधेयः. त्वदनुकूलं संधिं विधातुमहं साहाय्ययिष्यामि. वर्णै-
स्वामित्वेन दिल्लीश्वरो मे मान्यस्तथैव सजातीयत्वेन त्वमपि. त
किमभिमतमिति निवेदयेति.

शिवराजश्चेदं पत्रं लब्ध्वा संमुदितस्तस्य प्रत्युत्तरं लिखि-
रघुनाथपंतनामानं परमकुशाममतिं दूतं प्रेषयामास. जयसिं
समागतं शिवराजदूतमाकर्ण्य सन्तुष्टः सत्कृत्य तं. शिवरा

शिवराजप्राणान् रक्षितुं वचनं ययाच. सोऽपि निष्कपटमतिस्तथा प्रतिज्ञाय जगाद 'यद्यपि वयं दिल्लीश्वरं यवनं सेवामहे तथापि अस्मा- भिरार्याणां शीलं न त्यक्तं. यथा चेमे यवना एकमुक्त्वाऽन्यदेव कुर्वन्ति तथा नैव वयं रजपुतक्षत्रियाः. किंबहुना यथैव मे पुत्रः कि- रातसिंहस्तथैव शिवराजोऽपि इति.' इदं च तदीयं वचनं लब्ध्वा निर्भी- रघुनाथपन्तः स्वामिने सर्वं निवेद्य जयसिंहनिवासगमनाय प्रार्थयत शिवराजोऽपि तथैव विधातुं मतिं चक्रे.

अत्रान्तरे दिलेरखानो जयसिंहः शिवराजेन संधातुमिच्छतीति ज्ञात्वा 'इमे आर्याः परस्परं मिलिता' इति मनसिकुर्वाणो ज- सिंहमवदत्. भवद्भिः स्वमत्या शिवराजेन समं संधिर्न विधेयः किंतु तदाशयं ज्ञात्वा दिल्लीश्वरो बोधनीयः. स यथाऽज्ञापयेत्तथा कर्तव्यं. अहं चाचिरादेव पुरंदरदुर्गं ग्रहिष्यामि. भवद्भिश्च सिंह- गडदुर्गमाक्रमणीयमिति. राजनीतिचतुरः स जयसिंहो यवनस्वभा- सम्यग्जानन् शनैस्तमवदत्. 'शिवराजः स्वयमेवागत्य दिल्लीश्वरस्य सामन्तो भवितुमिच्छतीत्यधुना विग्रहो न योग्यः. शिवराजेन यानि खलु दुर्गाण्यसमद्राज्यतो गृहीतानि तेषां ग्रहणेनैव वयं कृतकृत्या भविष्यामः. यदि च सर्वेषां दुर्गाणां स्वायत्तीकरणार्थं युष्माकं मनोरथः स्यात्तदा सोऽशक्य इति निःसंदेहं ज्ञातव्यं. इमानि च सह्याचलस्य शिखरेषु विराजमानानि स्वामिभक्तवदधिपपालितानि

दुर्गवासिनोऽयुध्यन्त. अचिरादेव मावळेसैनिकैः पराजितान् पलाय-मानान् यवनसैनिकान् प्रेक्ष्य कोपान्धः स दिलेरखानः स्वयमेकबद्ध-भूत्वा धानुष्कैः शरवृष्टिं कारयामास. स्वयमपि धनुर्गृहीत्वा युयुधे. मुरारबाजिस्तु तदानीं कालपुरुष इव यवनसैनिकान् संहरन् स्वदेह-मपि क्षुद्रं मेने. ततो बहुभिर्यवनसैनिकैराक्रम्य छिन्नेऽपि वामे चर्मफलके वस्त्रेणैव सव्यं हस्तं वेष्टयित्वा खड्गप्रहारान् परितः प्राहरत्.

तदानीं तु तस्य मुरारबाजीप्रभोः शौर्यं स्वामिभक्तिं च समवलोक्य यवनसेनापतिः सानन्दं तमवदत्. 'यदि त्वं दिल्लीशस्य सैनिको भविष्यसि तदाऽहं तुभ्यमुत्तमं पदं दत्वाऽवश्यमेव सत्करि-ष्यामीति' मुरारबाजिप्रभुस्तस्येदं वचनमाकर्ण्य कोपेन परीतचेताः सावेशं जगाद. 'रे रे यवनसेनापते! अस्माकं पुण्यश्लोकस्य शिवरा-जस्य मुखान्निर्गतमेकमपि अभिनन्दनाक्षरं कृत्स्नस्य भारतवर्षसाम्राज्यस्य प्रदानादपि समधिकं मन्ये. स्वल्पमेदिनीपुरस्य लोभेन स्वामिद्रोहं यवना एव कुर्वन्ति न महाराष्ट्रीयाः. यतो मदीया जननी [illegible] बान्धवा अस्मिन् समरे पतितस्य मे कण्ठं गृहीत्वा प्राणः संस्मरि-यस्य नूनं [illegible] तदाऽहं धन्यो भविष्यामि' इति. उक्त्वा चेदं समरं दिलेरखानस्य-कम्. ततस्तेन पुनरपि युद्धं. दिलेरखानश्च तं कदाचिदपि स्ववशं-कलङ्क निर्दिश्य कुद्धस्तेन बाणेन तं कण्ठे प्राहरत्. प्रहतश्च सः

प्रकृतिमापन्नं तं यवनसेनापतिं समालोक्य चतुरो जयपुराधिपः शिव
राजं स्वनिवासमाह्वयत्. शिवराजोऽपि महता सैन्येन परिवृत
जयसिंहस्य निवासं गत्वा तेन सत्कृतो दिलेरखानमपि संतोषयामास
तदानीं दिलेरखानः पुरंदरदुर्गं राजवैजयन्तीसमलंकृतं विधातुं विज्ञाप
यामास. शिवराजोऽपि तं वृथाऽभिमानिनं ज्ञात्वा प्रकटमाह 'यवनसे
नापते? एकेनैव पुरंदरदुर्गेण किं? यावन्ति सर्वाणि मे दुर्गाणि तावन्ति
दिल्लीश्वरवैजयन्तीसंभूषितान्येव भवन्तु. इति. निगद्य चैवं स सत्य
वचनः शिवराजस्तदानीमेव स्वसेवकमाहूय पुरंदरदुर्गाधिपं दुर्गप्राकारे
दिल्लीश्वरराजवैजयन्तीं स्थापयितुमादिदेश. स्वामिनियोगपालनतत्पर
स तस्मिन्नेव क्षणे तां राजवैजयन्तीं तत्र स्थापयामास. तेन सन्तुष्ट
स दिलेरखानः 'सन्तुष्टोऽहं युष्माकं सत्यवचनेन. जयपुराधिपतिना
सह संमन्त्र्य संधिनियमा विधेयाः, अहं तु तत्रानुकूल एव. वस्तुतस्तत्र
मुख्या यूद्धाश्च. अहं तु केवलं तेषां साहाय्यार्थं प्रेषितोऽस्मीति जगा
शिवराजोऽपि तावतैव कृतकृत्यो जयपुराधिपनिवासमागत्य तस्मै स
निवेदयामास.

(५)


अथ जयसिंहः शिवराजानुमत्या संधिमीदृशं व्यधात्. शिव
राजेन यावान्निजामशाहीराज्यान्तर्गतो भूविभाग आक्रान्तः, स तत्रत्यै
र्दुर्गैः समं दिल्लीश्वराय समर्पणीयः. तथा तत्रस्थान्येव द्वादश दुर्गाणि

१३ दिल्लीनगरगमनं, तत्र कारागारवासश्च.

१ पश्चाद्राज्यव्यवस्था.
२ मार्गे बहुमानलाभः
३ दिल्लीपतेः कापट्यं.
४ बन्दिवासः.

(१)

एवं दिल्लीनगरं जिगमिषुः शिवराजः स्वमन्त्रिमण्डलमेकदैकत्र कर्तव्यमपृच्छत्. ते सर्वेऽपि मंत्रकुशला मन्त्रिण आहुः—दिल्लीश्वरे स्वामिन् विश्वस्य दिल्लीगमनं स्वामिचरणानामस्मभ्यं न रोचते. अवरंगजेबो धूर्तनायकः. अयं स्वबन्धून् घातयामास, अयं च पितरं कारागारे स्थापयित्वा [illegible]. स्वकीयेषु तथा परकीयेषु स्वप्नेऽपि न विश्वसिति. अथ तस्मिन् मायात्मके विश्वासघातके विश्वस्य स्वामिचरणा गच्छन्तीति न जानीमहे. कदापि विश्वसनीयः [illegible] धार्मिकेन नतु राजनीतिविदा. स तु महमदीयधर्मानुसारेण सर्वान् सनातनधर्मं द्वेष्टि. वयं तस्मान्महाद्वेषिणः स्वामिनः [illegible] अस्माकं. तस्मात्तु स्वामिनो यवनराजधानीगमनमिति.



१३ दिल्लीनगरगमनं, तत्र कारागारवासश्च.

१ पश्चाद्राज्यव्यवस्था.
२ मार्गे बहुमानलाभः
३ दिल्लीपतेः कापट्यं.
४ बन्दिवासः.

(१)

एवं दिल्लीनगरं जिगमिषुः शिवराजः स्वमंत्रिमण्डलमेकत्रीकृत्
कर्तव्यमपृच्छत्. ते सर्वेऽपि मंत्रकुशला मंत्रिण आहुः—दिल्लीश्वरस्
चासि विश्वस्य दिल्लीगमनं स्वामिचरणानामस्मभ्यं न रोचते. अव-
मवरंगजेबो धूर्तनायकः कथं स्वबन्धून् घातयामास, कथं च पितरं
कारागारे स्थापयित्वा हतवानिति सार्वजनीनं. स्वकीयेषु तथा परकीयेषु
यो स्वप्नेऽपि न विश्वसिति. कथं तस्मिन् मारात्मके विश्वासघातके
विश्वस्य स्वामिपादा गच्छन्तीति न जानीमहे. कृतघ्नेऽपि विश्वसनं
तत्त्वविदां शोभते ननु राजनीतिविदां. स तु महंमदीयधर्मानुयायी
सर्वदा सनातनधर्मं द्वेष्टि. तदा तस्योद्धारतत्परान् स्वामिपादान् द्वेष्टीति
किमु वक्तव्यं. तस्मादयुक्तमेवतद्यवनराजधानीगमनमिति.

भवन्तश्च सर्वे राज्यकार्यकुशलाः कमप्येकमग्रेसरं विधाय संभूय
स्वराज्यं वर्धयिष्यन्ते. मम च कर्तव्यं स्वराज्यस्थापना तथा गोब्राह्मण
प्रतिपालनमेवेति सर्वविदितं. तच्चैवंविधयाऽपि संभवति.

अन्यच्च—वयं विजापुरराज्यस्य सांनिध्यतो शात्रवृत्या
योद्धुं न बिभीमः. परन्तु दिल्लीनगरस्य विप्रकृष्टत्वेन परमैश्वर्यव
त्तेन च दिल्लीश्वरेण योद्धुं सहसा न प्रभवामः. अनेन दिल्लीश्वरे
नापमपि संशयो विनश्येत्.

मंत्रिणः ! सर्वथा साम्प्रतं दिल्लीनगरगमनं तु प्राप्तमेव. स च
कपटी दिल्लीश्वरो मां प्रतिबंधे स्थापयेन्न तु प्राणैर्वियोजयेत्. यस्मा
त्थाकरणे तस्यैव हानिः स्यात्. प्रतिबन्धे च स्थापितोऽहं यया कयाचि
युक्त्या ततो निर्गत्य समागमिष्यामि. पश्चाच्च मद्वृत्तं जानन्तो भव
यथोचितं वर्तन्तामिति.

तदिदं शिवराजस्य भाषणं तथा दिल्लीनगरगमने निश्चयं
विलोक्य तूष्णींस्थितास्ते सर्वे मंत्रिवरा राज्यकार्याणि कर्तुं प्रतिज्ञां
अथ शिवराजः स्वस्य पश्चाद्राज्यव्यवस्थां विधातुकामः 'मोरोपन्तं
बा,अण्णाजिदत्तोसुरनीस,निळोसोनदेवमुजुमदार'नामधेयान् प्र
मुख्यान् मन्त्रिगणान् मुख्यान्विधाय तदाज्ञया वर्तितुं सर्वानतॉ
प्रतापरावगुजरप्रभृतीन् सरदारान् जिजाईप्रभृतीनां रक्षणार्थं
पालनार्थं कथयामास. सर्वेभ्योऽपि दुर्गादिरक्षणं स्वस्वं के

एवं सर्वां व्यवस्थां विधाय निश्चिन्तः शिवराजो नियते
सकलशुभलक्षणसमन्विते दिल्लीनगरं गन्तुं निर्गतोऽपरं भगव
मातरं जिजादेवीं प्रणिपत्यानुज्ञामयाचत. सा च दूरगामिनं
निरीक्ष्य स्नेहविह्वलाऽपि राज्यकार्यगौरवं जानन्ती विसर्जय
ततश्च भगवतीं प्रणम्य स्वपत्नीं सर्वांदेवीमापृच्छ्य शिवराजः प्रा

(२)

कपटी दिल्लीश्वरोऽवरंगजेबः शिवराजं स्वस्मिन्विश्वस्य स
च्छन्तं समाकर्ण्य परं मुदितस्तत्तत्स्थानाधिकारिणः प्रति 'युवरा
त् सत्करणीय आदरणीयश्च शिवराजः' इति आज्ञापयामास.
यत्र यत्र शिवराजोऽगच्छत्तत्रत्याः सर्वे एवाधिकारिणस्तं सादर
यन्त. सैनिकांश्च संतोषयामासुः. शिवराजश्च प्रकृत्यैव महामान
आसीत्तेन स स्वल्पमपि अपमानं नासहत. एकदा शिवराजो दि
नगरं गच्छन् मार्गे औरंगाबादनगरस्थं जयपुराधीशं जयसिंहं द्रष्टु
च्छुस्तन्नगरमाययौ. यथानियमं शिवराजः स्वागमनं दूतमुखेन नग
धिपाय न्यवेदयत्. परन्तु गर्वमुग्ध. स यवनः स्वयं शिवराजं सत
र्तुं नागतः स्वस्य भ्रातुष्पुत्रं प्रेषयामास. शिवराजोऽपि तदीयमभिम
जानन् सहसा जयसिंहस्य निवासमेवाजगाम. तत्र च स्वतंत्रराज

१ • तं शिवराजमवेक्ष्य स अधिपो भीतः क्षमां याचित्वा स
दोषमादरयामास.

इति पृष्टः पंचसहस्रमादिनामाधिपत्यमिति प्रत्यवदत्. तदेवाकर्ण्य कोपातिरेकसंतप्तस्ताम्राभ्यां नेत्राभ्यामग्निस्फुलिंगान् वर्षन्निव कोप-करालया दृशा तं दिल्लीश्वरं दहन्निव शिवराज उच्चैः 'किमहमित्य-


. . . .

दिल्लीश्वरपारिपार्श्विका अपि क्षणमात्रं स्वशस्त्राणि विस्मृत्य आश्चर्य-व्धा अजायन्त. स्वयं दिल्लीश्वरोऽपि शिवराजस्य नरसिंहस्येव घोरां गर्जनां निशम्य निमीलितलोचनयुगलः परमेश्वरमस्मरत्.

अथ भीतोऽपि दिल्लीश्वरो धैर्यमवलंब्य 'शिवाजिः किं वदति' रामसिंहमपृच्छत्. तेन च तदाशये निवेदित एव स दुष्टमतिः अवरंगजेबः शिवराजं स्वावासं प्रापयितुं रामसिंहमाज्ञापयत्. स्वयमपि सभां विसर्जयित्वा स्वप्रासादं प्रतिययौ. शिवराजोऽपि रामसिंहेन विहितसान्त्वनो विवेकेन चित्तं वशीकृत्य तूष्णीं स्वस्थानमायसौ. वाचकाः ? यद्यपि शिवराजो न दिल्लीपतिसमस्तथापि तदधिकारिणां शिवराजसदृशोऽन्यः कोऽपि नासीत्. एवंसत्यपि दिल्लीश्वरेण स्व-माहूयेदृशमपमाननं नाम सत्यमेव कृतघ्नता. किंच–शिवराजः क्रूर-कर्माणं पितृघातकं बन्धुनाशकं त जानन् दिल्लीनगरगमनं न्यषेधयदेव, परन्तु वृद्धो जयसिंहस्तं भूयो भूयो दिल्लीनगरं गन्तुं प्रेरयामास. जयसिंहोऽपि सर्वथोत्तमविधया शिवराजं सत्कर्तुं दिल्लीश्वराद्वचनं गृहीतवान्. परन्तु पापः ५र्वमपि स्वकीयं वचनादिकं विधूय शिव-राजमित्थमपमानयत्.

सिंहोऽपि दिल्लीश्वरस्य छद्मतां तथा कापट्यमवेक्ष्य रहो निभृ
तमसाहाय्ययत्. अत्रान्तरे दिल्लीश्वरो रामसिंहद्वारा शिवराजं
प्रलोभेनानुकूलं विधातुं प्रायतत, परन्तु बुद्धिमान् शिवराजः केवलं
विजापुरप्रभृतीनां दक्षिणापथवर्तिनां यवनराज्यानामाक्रमण ए
युष्मान् साहाय्यविष्यामीति वदन् न तत्र स्थातुमैच्छत्.

अथ सामदानाभ्यां बहुशो बोधितोऽपि शिवराजो यदा नानुकूलोऽभूत् तदा स कपटी दिल्लीश्वरो दण्डेन तं वशे विधा मतिं चक्रे. स च शीघ्रमेव पोलादखाननामानं यवनमाहूय शिवराजनिवासभवनमभितः पञ्चसहस्राणि शस्त्रधारिणां स्थापनार्थमादिदेशत् च तं अनिर्याणिकाज्ञेति कस्याऽपि प्रवेशो निषिद्धः. शिवराजोऽपि कतिचिद्दिवसेष्वेवं तेन रक्षिणा निरुद्ध एव सन्नवसदिति. स चैवं [illegible] राजाज्ञया पंचसहस्रसैनिक [illegible] स्थापयामास [illegible] शिव[illegible] [illegible] [illegible] एव [illegible] [illegible] दिल्लीश्वर च [illegible].



एवंवृत्तेषु कतिपयदिवसेषु पुनरपि आत्मानं नीरोगं ख्याप-यन् शिवराजः स्वारोग्यसंतोषप्रदर्शनार्थं पुनरपि पूर्ववत् फलादिभ-क्ष्यपरिपूर्णाः पेटिकाः प्रेषयितुमारभत. काश्चन पेटिकाश्चतुर्वाहक-वाह्या आसन्. निरीक्षकाश्च पूर्ववदेव काश्चन पेटिकाः परीक्ष्य वीतसंदेहा अन्यास्तथैव प्रैषयन्.

(३)

इत्थं विश्वस्तान्निरीक्षकान् प्रेक्ष्य शिवराजः पलायितुं मतिं चक्रे. तदर्थं च परमविशालास्तिस्रो विश्वस्तवाहकवाह्याः पेटिका विधाय तत्रैकस्यां स्वयमुपाविशत्. अन्यस्यां तु स्वतनयं संभार्जि. अथाश्वं स्वामिभक्तं स्वशरीररक्षकं हिरोजीफर्जन्दं 'त्वं हि मदीयं वेषं धृत्वा मदीये शयने स्वपिहि. अयं च बालकस्तव समीपे तिष्ठतु. यदि कदाचित् कश्चन निरीक्षक आगत्य पृच्छेच्चेत्तदाऽस्य महाराजः प्रवृद्धशिरोवेदनो न मानवभाषणं श्रोतुं शक्नोति तन्मात्रूतेति एष बालक एव प्रतिवदतु. प्रभाते च त्वमपि केनाऽपि मिषेणेतो निर्गतः संकेतस्थलमागच्छेति.

सोऽपि स्वामिभक्तः सर्वं तदुक्तं स्वीकृत्य तथैवान्वतिष्ठत्. शिवराजश्च कुलस्वामिनीं भवानीं नमस्कृत्य स्वहस्ते भवानीखड्गं धारयंस्तस्यां पेटिकायां स्थित्वा तस्मात् प्रतिषेधान्निरगात्. निर्विघ्नं

सर्वानप्यमुंचत्. एकदा च कस्मिंश्चित्तीर्थे स्नातुं शिवराजो ययौ. त ब्राह्मणे संकल्पं कथयति सत्यन्ये ब्राह्मणाः परस्परं शिवराजपलायन वार्तामेव समलपन्. तान् संलापाञ्निशम्य शिवराजः शीघ्रं स्नात सत्वरं स्थानान्तरं प्रायात्.

यदा खलु शिवराजः स्वदेशं प्राप्य स्वप्रधानामात्यस्थाला मथुराक्षेत्रवासिनः संभाजिना समं समागन्तुं दूतद्वारा न्यवेदयत्तद ते त्रयोऽपि बन्धवः क्रमेण दक्षिणापथगामिना मार्गेण प्रावसन्. मार्गे च संभार्जि राजचिन्हयुक्तं समीक्ष्य जातसंदेहेन दिल्लीश्वराधिकारिणा ते सर्वे प्रतिबंधे निहिता. 'यद्येष युष्माकं वंशजस्तदाऽनेन समं भवन्त एकपात्रे भुंजन्तामिति उक्तास्ते संभाजिना सममेकपात्रेऽ भुंजत. तेन निवृत्तसंशयः स यवनाधिकारी तान् सर्वानमुंचत्.

सज्जना ? एतादृशाः पूर्वं ब्राह्मणा वा क्षत्रिया वाऽऽसन्. तत शिवराजः स्वराज्यं स्थापयितुं प्राभवत्. सर्वतो जाग्रत्सु बलिष्ठेषु यवनेषु कः खलु एकाकी स्वामिभक्तसाहाय्यं विनाऽल्पमपि देशकार्यं कर्तुं प्रभवेत् ! तेच परस्परं मिलित्वा कार्याणि चक्रुः. यत्र तु केवलं नाम्ना ब्राह्मणा वा क्षत्रिया वा कलहायमानाः स्वमातृभूमिं परकीयानां दासीं कुर्वन्ति तत्र वक्तव्यस्यावसर एव न. अस्तु.

सर्वानप्यमुंचत्. एकदा च कस्मिंश्चित्तीर्थे स्नातुं शिवराजो ययौ. तत्र ब्राह्मणे संकल्पं कथयति सत्यन्ये ब्राह्मणाः परस्परं शिवराजपलायनवार्तामेव समलपन्. तान् संलापान्निशम्य शिवराजः शीघ्रं स्नात्वा सत्वरं स्थानान्तरं प्रायात्.

यदा खलु शिवराजः स्वदेशं प्राप्य स्वप्रधानामात्यद्वयाञ्जन् मथुराक्षेत्रवासिनः संभाजिना समं समागन्तुं दूतद्वारा न्यवेदयत्तदा ते त्रयोऽपि बन्धवः क्रमेण दक्षिणापथगामिना मार्गेण प्रावसन्. मार्गे च संभाजिं राजचिन्हयुक्तं समीक्ष्य जातसंदेहेन दिल्लीश्वराधिकारिणा ते सर्वे प्रतिबंधे निहिताः 'यद्येष युष्माकं वंशजस्तदाऽनेन सम भवन्त एकपात्रे भुजन्तामिति उक्तास्ते संभाजिना सममेकपात्रेऽभुंजत. तेन निवृत्तसंशयः स यवनाधिकारी तान् सर्वानमुंचत्.

सज्जनाः ? एतादृशाः पूर्वं ब्राह्मणा वा क्षत्रिया वाऽऽसन्. तत शिवराजः स्वराज्यं स्थापयितुं प्राभवत्. सर्वतो जाग्रत्सु बलिष्ठेषु यवनेषु कः खलु एकाकी स्वामिभक्तसाहाय्यं विनाऽत्यल्पमपि देशकार्यं कर्तुं प्रभवेत् ! तेच परस्परं मिलित्वा कार्याणि चक्रुः. यत्र तु केवलं नाम्ना ब्राह्मणा वा क्षत्रिया वा कलहायमानाः स्वमातृभूमिं परकीयानां दासीं कुर्वन्ति तत्र वक्तव्यस्यावसर एव न. अस्तु.

(५)

एवं सर्वान्विघ्नान् भगवतीकृपयाऽपोह्य दिल्लीश्वरप्रतिबंधाभिर्गतो
समुक्तो विधुरिव शिवराजो नवभिर्मासैः स्वराज्यमागच्छत्. स च
धर्म कार्यक्षेत्रमागत्य स्वाधिकारिभ्यः स्वस्यागमनं निवेद्य ततएव
राजगडदुर्गं स्वराजधानीमाययौ. सर्वे ते प्रथमतो द्वारपालान् 'केचन
तीर्थगामिनः संन्यासिनो मातरं जिजादेवीं द्रष्टुमिच्छन्ति' इति
पयितुमवदन्. ते च द्वारपालास्तथा निवेद्य गृहीताभ्यनुज्ञाः सर्वा-
ति तान् प्रवेशयामासुः. शिवराजप्रभृतिषु तेषु सर्वेषु मातरं जिजा-
वीं प्रणिपत्य स्थितेषु शिवराज एवैकाकी पुरतो जगाम. सा च
जिजादेवी मार्गपरिश्रमातिरेकक्लान्तं शिवराजं न प्रत्यभिज्ञानन्ती
संन्यासिनं निःशंकमागच्छन्तं विलोक्य विसिष्मिये. अथ यदा
शिवराजः स्वशिरस्त्राणं निष्कास्य तदङ्के स्वशिरो न्यधात्तदा सा
सहसा जिजादेवी तं प्रत्यभिज्ञायानन्दातिशयेन मुमूर्छ. तं च क्रोडे
कृत्वा प्रमोदाश्रुभिरभिषिषेच. ततः सा स्वामिभक्तान् सेवकानभि-
च तेभ्यः प्रभूतानि पारितोषिकाणि वितार.

अथ 'शिवराजः पुनरपि सुखेन स्वराजधानीमाययौ' इति
समाकर्ण्य सर्वे जना दर्शनार्थं प्रतिदिनमागच्छन्. दृष्ट्वा च तं
पुनः आत्मानं कृतकृत्यममन्यन्त. ततः शिवराजः स्वाधिकारिणां
सभां विधाय तत्र पूर्वोक्तेभ्यः स्वामिभक्तेभ्यो विश्वासरक्षण-

द्विषो महान्ति यतिपो[illegible] [illegible] मन्दसमाना. [illegible]
नी नगरी गुर्जरा[illegible]. [illegible] च [illegible] दुर्लिलो
[illegible] निरगमाम. [illegible]
[illegible]. [illegible] [illegible]
पर्व [illegible] [illegible] [illegible] मनक-
[illegible]मारुरुपति स्म.

तेभ्यो जनेभ्यो घोषयितुं नितरामुत्सुकाः शिवराजमभिषेकार्थं ह्यामासु.

५ विजापुरराज्ये तथा दिल्लीश्वरराज्ये ये स्वकीया जयसिंह-वृता आर्यक्षत्रिया आसंस्ते च मनसा शिवराजं साहाय्ययितुमि-च्छन्तोऽपि तदुद्यमस्याशाश्वतिकत्वं मन्वानास्तटस्था एवासन्. विहिते राज्याभिषेके तत्साहाय्यलाभोऽपि भविष्यतीति ते मेनिरे.

६ विशेषतश्च धार्मिकविधिभिर्विहिताः संस्कारा यथा अज्ञानां हृदयेषु स्थिरा भवन्ति न तथाऽन्ये. तथाचेमं धार्मिकं राज्याभिषेकं विधाय जनसंग्रह आधिक्येन भविष्यतीत्यपि.

७ एकदा शिवराजः केनापि प्रसंगेन सर्वान् स्वसजातीयान् भोजनाय समाह्वयत्. तत्र सभाधिकारिणा सर्वेषामासनानामपेक्षया शिवराजस्यासनमुन्नतं विहितं. तमिममासनानां नीचोच्चभावमपमान-कारकं मन्यमानाः सर्वे ते महाराष्ट्रीया क्रुद्धाः सभाधिकारिणं प्रत्य-वोचन्—वयं यदोः कालाद्राज्यं कुर्वाणा राजचिह्नचामरादिमण्डि-तशिरसो विजापुराधीशप्रभृतिभिः सार्वभौमैः सम्मानिताः स्म. शिवराजस्य पिता तु विजापुरराज्येऽल्पभूपतिक एवासीदिति सार्वजनीनं. यद्यपि शिवराजो बलाढ्यो धनाढ्यश्च संवृत्तस्तथापि स न सार्वभौमैर्न केनचिद्भूपेन वा प्रजाजनैर्वा यथायोग्यं संमानित- तदर्थं [illegible]

तस्य राज्यस्य दुरवस्थां द्रष्टुमपारयन्निभृतं शिवराजाय पत्रद्वारा सर्वं वृत्तं न्यवेदयत्. शिवराजोऽपि बन्धोरिमामवस्थां ज्ञात्वा दुःखाकुलः सत्वरमेव कर्तव्यबोधकं पत्रं तस्मै व्यसर्जयत्. तल्लब्ध्वा क्रोधान्धः स मलिनमतिर्व्यंकोजिराजस्तं महाभागं परं निरभर्त्सयत्. नानाकुशब्दैरताडयत्. नीचजनैरपमानयत्. ततश्च स मानी गुणी प्रधानामात्यः 'अत्राऽवस्थानमधुना नोचितं' इति निश्चित्य ततो निर्गत्य शिवराजं द्रष्टुं रायगडदुर्गमागन्तुं प्रातिष्ठत. राजनीतिचतुरः स नरश्रेष्ठो रिक्तेन पाणिना महाराजं कथं द्रष्टव्य इति विचारयन् गोवळकोंडे-राज्यस्यामात्यौ ददर्श. परमधार्मिकौ तौ कर्णाटकविभागे तथा कृत्स्नेऽपि दक्षिणापथे शिवराजस्य राज्यं वर्धयितुं तेन प्रधानामात्येन रघुनाथपन्तेन याचितौ सन्तोषेण साहाय्यं विधातुमङ्गीचक्रतुः. रघुनाथपन्तद्वारा शिवराजं स्वराज्यागमनाय प्रार्थयामासतुः. स्वयं भागानगराधिपोऽपि शिवराजप्रतापश्रवणभीतस्तदीयं स्नेहमाचकांक्ष. रघुनाथपन्तश्चेदं राजकारणं लब्ध्वा कृतकृत्यो महता संतोषेण सातारानगरमागत्य छत्रपतिं शिवराजं वीक्ष्य सर्वं वृत्तं न्यवेदयत्. विज्ञापयाऽऽस च कर्णाटकविभागाक्रमणाय. शिवराजोऽपि स्वराज्यवर्धनार्थं रात्रिंदिवं प्रयतमानोऽनायासेन समागतमिदमाव्हानमङ्गीकृत्य दायभागयाचनामिषेण कर्णाटकविभागं स्वा..व विधातुमाचकांक्ष. अस्मिन् समये विजापुरामात्यस्य ..श्वरनियुक्तस्य दक्षिणापथाधिकारिणश्च स्नेहेन विजापुराधीशो

जोऽपि स्वसैन्येन समं कृतनगरप्रवेशः प्रजाजनैः पुष्पवृष्ट्यादिभिः सत्कारैरभिनंद्यमानो नियते स्थानेऽवसत्. ततश्च शुभे दिने स्वामात्यैः समं राजसभां गत्वा भागानगराधीशं गोंवळकोंडाराज्याधीश्वरं यवनाधिपमपश्यत्. सोऽपि समागच्छन्तं शिवराजमाकर्ण्य महता मोदेन कतिपयपदैः प्रत्युद्गत आश्लिष्य तेन सममेकासनेऽतिष्ठत्. स यवनाधिपश्च शिवराजस्य सैन्यं तथा तदीयामाकृतिमवलोक्य परं तुष्टस्तदधिकारिभ्यः पारितोषिकाणि वितीर्य शिवराजाय गजांस्तथोत्तमानश्वान्नानाविधान् रत्नालंकारान् दत्वा व्यक्तीकृतस्नेहो भागानगराधीशः शिवराजं परं समतोषयत्.

अथ शिवराजे भागानगरमधिवसति सति एकदा रघुनाथपन्तो यवनाधिपस्य दर्शनार्थमगच्छत्. तदा तस्मै स यवनाधीशः शिवराजसैनिकशौर्यमपृच्छत्. रघुनाथपन्तोऽपि तास्ता वृत्ताः शौर्यकथाः कथयन् 'स्वामिन् ? शिवराजसैनिका गजानपि तृणवन्न गणयन्तीति' वदन्नस्तौत्. तेन विस्मितः स तेषां शौर्यं द्रष्टुं कृतनिश्चयो रघुनाथपन्तद्वारा एसाजीकंकप्रभृतीन् दश सैनिकानाव्हयत्. द्वितीये दिने सकलप्रजाजनालंकृते राजप्रासादांगणे स्वयं राजपुरुषैः समं वातायनमधिवसानः स यवनाधिपः प्रमत्तं मधुनोत्तेजितं गजेन्द्रं मुक्त्वा तेन समं योध्दुं शिवराजसैनिकानामन्यतममाज्ञापयामास. तदानीमेव एसाजीकंकः केवलं खड्गहस्तः पुरतोभूय तस्थौ. सोऽपि मत्तेभस्तदाक्रमणाय

सोऽपि स्वसैन्येन समं कृतनगरप्रवेशः प्रजाजनैः पुष्पवृष्ट्यादिभिः सत्कारैरभिनंद्यमानो नियते स्थानेऽवसत्. ततश्च शुभे दिने स्नानाद्यैः धर्मं राजसभां गत्वा भागानगराधीशं गोवळकोंडेराज्याधीश्वरं यवनाधिपमपश्यत्. सोऽपि समागच्छन्तं शिवराजमाकर्ण्य महता मोदेन कतिपयपदैः प्रत्युद्गत आश्लिष्य तेन समनेकासनेऽविष्टत्. स यवनाधिपश्च शिवराजस्य सैन्यं तथा तदीयामाकृतिमवलोक्य परं तुष्टस्तदधिकारिभ्यः पारितोषिकाणि वितीर्य शिवराजाय गजांस्तथोत्तमानश्वान्नानाविधान् रत्नालंकारान् दत्वा व्यक्तीकृतस्नेहो भागानगराधीशः शिवराजं परं समतोषयत्.

अथ शिवराजे भागानगरमधिवसति सति एकदा रघुनाथपन्तो यवनाधिपस्य दर्शनार्थमगच्छत्. तदा तस्मै स यवनाधीशः शिवराजसैनिकशौर्यमपृच्छत्. रघुनाथपन्तोऽपि तास्ता वृत्ताः शौर्यकथाः कथन् 'स्वामिन् ? शिवराजसैनिका गजानपि तृणवन्न गणयन्तीति' दम्रस्तौत्. तेन विस्मितः स तेषां शौर्यं द्रष्टुं कृतनिश्चयो रघुनाथपन्तद्वारा एसाजीकंकप्रभृतीन् दश सैनिकानाव्हयत्. द्वितीये दिने सकलजाजनाढंकृते राजप्रासादांगणे स्वयं राजपुरुषैः समं वातायनमधिमानः स यवनाधिपः प्रमत्तं मधुनोत्तेजितं गजेन्द्रं मुक्त्वा तेन समं द्धुं शिवराजसैनिकानामन्यतममाज्ञापयामास. तदानीमेव एसाजीकः केवलं खड्गहस्तः पुरोभूय तस्थौ. सोऽपि मत्तेभस्तदाक्रमणाय


गृण्हन् क्रमेण श्रीशैलमल्लिकार्जुनक्षेत्रमागमत्. तत्र चालौकिकसौन्दर्यशालिनीं वनश्रियं तथा कृष्णानदीं वीक्ष्य संजातवैराग्यः श्रीशैलमल्लिकार्जुनं नत्वा तत्रैव वस्तुमियेष. परन्तु रघुनाथपन्तो राजकार्यप्रवीणस्तं रहस्यवदत्–राजन्? इदं संन्यासियोग्यं वैराग्यं राजर्षेस्तव न योग्यं. त्वया हि गोब्राम्हणरक्षार्थं भुवमवतीर्णेन तदेव सम्यगनुष्ठेयं. स्वामिन्? प्रबलेभ्यो दैत्येभ्य इव यवनेभ्योऽस्मान् रक्षितुं त्वदन्यः कोऽपि नास्ति. तत्कर्तव्यपराङ्मुखो मा भूः. भगवान् त्वां चिरायुषं विधाय यवनान् भारतवर्षान्निःसारयत्विति. इदं च महामात्यस्य प्रतिभामयं भाषणमाकर्ण्य प्रकृतिमापन्नः शिवराजो जनक इव तत्र पुण्यानि कर्माणि कृत्वाऽग्रेऽव्रजत्. ततश्च जवेनाग्रे गच्छन् शिवराजः चन्दीनामकं महादुर्गं रुरोध. चकार चात्मवशं. तथैव सर्वं तं प्रदेशं स्वकीयं कृत्वा तत्र स्वमतिनिधिं न्यधात्. अथ सकलभारतप्रसिद्धस्वादुसलिलायाः परमरमणीयवनश्रीभूषितायाः कावेर्यास्तीरे कृमनिवासस्ततएव व्यंकोजिराजाय स्वागमनं निवेदयामास. दूतमुखेन तमवदच्च– दिवंगतानां तातपादानां बहूनि वर्षाणि वृत्तानि. तैः संपादितः कृत्स्नो भूविभागो भवद्भिरेव भुज्यते. कदापि मह्यं वार्ताऽपि न प्रेष्यते. तमहं यवनाक्रान्तभूविभागमोचनार्थमत्रागत आयुष्मता द्रष्टव्यः. पश्चाच दायव्यवस्थां करिष्याम इति.

व्यंकोजिराजश्च परवंशवशः शिवराजस्य नियोगमाकर्ण्य मित्रेभ्यः कर्तव्यं पप्रच्छ. तानि च प्रकृतिकुटिलानि चभाषिरे. शिवराज

खलु यवनैराक्रान्तं. तन्मोचयितुं प्रयतमानस्य मे स्वल्पमपि स
ह्यमकृत्वा प्रत्युत विरोधः क्रियते. तदेतदत्यन्तमसमीचीनं. पौ
मकृत्वा जीवनमबलानां शोभते नतु पुनः क्षत्रियाणां. यदि त्व
कृत्स्नं दक्षिणापथं स्वायत्तीकर्तुमिच्छसि तदा सर्वथा त्वामहं स
ह्ययिष्यामिति. व्यंकोजिराजश्च श्रुत्वेममुपदेशं निभृतं तस्थौ.
कतिपयदिवसैः शिवराजो व्यंकोजिराजमुदासीनं वीक्ष्य स्वनि
गन्तुमनुमुमुदे. सोऽपि किंचिदनुक्त्वा स्वानिवासमगात्. अत्रा
महाराष्ट्रदेशादागतो दूतो दिल्लीश्वरो दक्षिणापथं जेतुं महता सै
समं स्वयमेवागच्छतीति निवेदयामास. तच्च श्रुत्वा शीघ्रमेव स्वरा
धानीं गन्तुकामः शिवराजः कर्णाटकविभागे नूतनं संपादितं भू
भागं परिपालयितुं रघुनाथपन्तं तथा हंबीररावसेनापतिं नियु
स्वयं स्वदेशमागन्तुं प्रातिष्ठत. शिवराजं कृतप्रस्थानमाकर्ण्य व्यं
जिराजस्य मित्राणि तं शिवराजसेनापतिमाक्रम्य पराजेतुं प्रोत्साहय
मासुः. सोऽपि तत् समीचीनं मन्यमानः कतिपययवनसैनिकैः स
वा सेनामाचकर्ष. रघुनाथपन्तस्तु स्वामिपुत्रोऽयमिति मत्वा यु
परिहरन् यवनसैनिकानजयत. व्यंकोजिराजश्च पलायनपर
[illegible]. रघुनाथपन्तप्रेषितेन लेखेन सर्वं वृत्तं विज्ञाय शिवः शि
राजः पुनरपि व्यंकोजिराजं पत्रद्वारा परं निरभर्त्सयत्. रघुनाथपन्
च सामदानेन [illegible]. व्यंकोजिराजश्च [illegible]
[illegible] न [illegible] मनोऽकरोत्. तदुपायं वीक्ष्य शिव

दीपाबाईव्या पृष्टः—शिवराजश्च दिल्लीश्वरप्रभृतिभिर्बलाढ्यैर्यवना-
यं युध्यते न कदापि पराजयं प्राप्नोति. वयं तु केवलेन स्वल्पे-
र्वीर्येण बलेन पराजिता मन्दभाग्या किं कुर्मः. साम्प्रतं स
यावत इति विललाप. तदिदं तदीयं वैराग्यकारणं श्रुत्वा साध्वी
देवी ' महाभागास्ते दिल्लीपतिप्रभृतीन् बलाढ्यान् यवनाधी-
नवीत्य वर्तन्ते. तत्रापि तेषामुद्योग एव प्रधानं कारणं. युष्माभिश्च
धिव ते. मम विरोधः कृतः.. अस्मांस्त्वान् युष्मादृशान् सेवकान् न्यायेन ते
परिपालयन्ति. तेषां महाभागानां नायमपराधो यत् पैतृकविभागयाचने.
कह तु मन्ये ते कृत्स्नं न गृह्णन्तीति तेषामुपकार एव. यतस्ते ज्येष्ठाः.
राज्यशासने सर्वथा ज्येष्ठस्यैवाधिकारो न कनिष्ठस्येति शास्त्रकाराः
आमनन्ति. पूर्वं च कनिष्ठा आस्तामियं शास्त्रकथा सर्वथा ताना
पित्र्य युष्माभिः पराक्रमो विधेयः. न यथा स्वतातपादानां यशः
प्रसारयन्ति तथैव युष्माभिरपि करणीयं. अनेन सुलभेन वैराग्येण
को वा लाभः! इति एव साध्व्या तया दीपाबाईव्या स्पष्टं बोधितः स
व्यंकोजिराजो किंतु वैराग्यं पुनरपि रघुनाथपन्तानुमत्याऽत्यजत.





१७ सज्जनसमागमः

१ धर्मे निसर्गतः प्रीतिः
२ सज्जनमंडली
३ रामदासस्वामिनामुपदेशः

वाचकाः ! अधुना श्रीशिवच्छत्रपतेरेतावत उत्कर्षस्य कार्यं किमिति अनेन विषयनिरूपणेन निरूपयितुमिच्छामि. बान्धवाः ! अस्योत्कर्षस्य कारणं शिवराजे वर्तमाना नैसर्गिकी धर्मप्रीतिः. धर्मशब्देनेह कस्याऽपि समाजस्य धर्मो नाभिप्रेतः किंतु सर्वेषां तत्तत्समाजधर्माणां प्राणभूतः परोपकारफलकः सदाचारधर्म एव गृह्यते. शिवराजश्च कियान् सदाचार आसीदित्यत्राहमेकमुदाहरणं कथयामि.

एकदा शिवराजः कल्याणविभागं जेतुं स्वामात्यमाबाजीसोनदेवनामानं प्राहिणोत्. सोऽपि तं प्रदेशं स्वायत्तीकृत्य सर्वमपि स्वजनं ... विजित्य परमद्रव्यसहितं भूमिमर्तीर्णां ... ... तां वीक्ष्य विस्मितः साधारणमतिः 'आगतीति' ... इव सद्गु स्वामिनश्चरणेभ्यः समर्पणीयेति मन्यमानश्चामात्य

रेभ्यो यवनाधिपेभ्यः सदाचारमिति. सर्वे सभ्यास्तदा सोऽमात्य इदं शिवराजस्य भाषणं निशम्य शम्बचित्तवृत्तयस्तं जनकमिव धार्मिकं प्रणम्य तदाज्ञामन्ववर्तन्त.

वाचकाः ! किमिदं न लोकोत्तरं ! गतास्ते परदारलोलुपा दिल्लीश्वरप्रभृतयो यवनराजास्तथा पुण्यश्लोको जनक इव धर्मरतः शिवराजश्च. तथापि यावच्चन्द्रदिवाकरस्थायि चन्द्रिकाधवलं तदीयं यशोमण्डलं सज्जनानानंदयत्येव.

अनया नैसर्गिक्या धर्मप्रीत्या स आबाल्यादेव दीनदयालुरासीदिति सर्वत्र महाराष्ट्रेतिहासे प्रसिद्धमेव. प्रायो धार्मिका जना आत्मौपम्येन सर्वत्र वर्तमाना दयालव एव भवन्ति.

(२)

तामिमां नैसर्गिकीं धर्मप्रीतिं तदीया माता सम्यगवर्धयदिति पूर्वं निरूपितं. यथा मात्रा सा वर्धिता तथैव तदानींतन्या सज्जनमण्डल्याऽपि. क्रूरैर्दुराचाररतैर्यवनैर्भारतवर्षे समाक्रान्ते सर्वे जना ऐहिकं तथा पारलौकिकं फलमलभमाना अत्यन्तमक्लिश्यन्. तत्रैहिकफलस्य स्वराज्यलक्षणस्य रक्षणाय यथा शिवराजः प्रादुर्बभूव, ... किकफलस्य मोक्षलक्षणस्य रक्षणार्थं स्थाने स्थाने सर्वत्र ... सज्जनमण्डली प्रकटीबभूव, महाराष्ट्रे तु सहस्रशः प्रादु-

शिवराजश्चेदं वृत्तं लब्ध्वा सन्तुष्टस्तान् द्रष्टुमैच्छत्, परन्तु ते रात्रिंदिवं वने वा ग्रामे वा नदीतीरे वा यत्रकुत्रापि पर्यटन्तश्चिरात्तन्मनोरथं नापूरयन्. रामदासस्वामिनां चायं विशेषो यत्तेऽन्यसाधुवत् संसार-चिन्तां विहाय केवलं भगवद्भक्तावेवात्मानं नारमयन्त किंतु यवन-संत्रस्तान् जनान्निरीक्ष्य परं खिन्नास्तान्मोचयितुमैच्छन्. अथ शिव-राजः श्रीरामदासस्वामिनां दर्शनार्थं रात्रिंदिवं वनाद्वनान्तरं पर्यटन् यानलब्ध्वा खिन्न एकस्मिन् गुरुवासरे महाबलेश्वरतीर्थं गत्वा स्नात्वा ब्राह्मणान् भोजयित्वा श्रीसमर्थचरणदर्शनं विनाऽन्नाग्रहणाय कृतशपथः सुष्वाप. द्वितीये दिने श्रीसमर्थानां पत्रं गृहीत्वा वयीन-एव शिष्यः शिवराजं प्रत्यागच्छत्. शिवराजोऽपि प्रमुदितस्तत्पठित्वा शीघ्रमेव चाफळमठं गत्वा तत्र रघुपतिं प्रणम्य श्रीसमर्थानां पुरो मुकुलितहस्तस्तस्थौ श्रीसमर्थाश्च तं शिवराजं मूर्तं महाराष्ट्रपराक्रम-मिव समीक्ष्य सन्तुष्टाः परमप्रीत्या तं सर्वं वृत्तमपृच्छन्. तन्मु-खात् सर्वं श्रुत्वा प्रमुदितमानसा नृप. पराक्रमान् शिवानुभूतजयमागुः शिवराजश्चानुग्रहणार्थं प्रार्थयत. श्रीसमर्थाश्च तं योग्यं मन्वाना महा-मंत्रोपदेशेनानुगृह्य कर्तव्यमित्थमुपादिशन् –राजन् ! मानवस्य प्रथमं कर्तव्यं परमात्मभक्तिः. सा च न परमेश्वरसंतोषाय किंतु तया स्वकल्याणमेव भवति. यतोऽभक्तो मानवः पशुवच्चिरं संसारे वर्तमानः परान् दुःखीकरोति. भक्तोऽपि निष्कर्मतया स्वकर्तव्य-मकुर्वन् सुखी भवति. यथा पाककस्य शिक्षणाधिकारिण्यो यथैव

परमेश्वरभीतिः. सर्वज्ञः परमात्मा मदीयानि पापकृत्यानि
क्रूरेण दण्डेन दण्डयेदिति मन्वानो मानवः कदापि उन्मत्तो
ति स्वकर्तव्यदक्षश्च जायते. राजन् ! इह खलु संसारे ते जना
ज्ञा ये ईश्वराद्बिभ्यति. प्रायः 'इन्द्रियारामा इन्द्रियसुखलाभेनैव
कृत्यतां भावयन्तो जनाः' इहोपलभ्यन्ते. तस्मात्तेषां मदोन्मत्तानां
पीडनैकध्येयानां नीचानां शासनार्थं राजशक्तिरपेक्ष्यते. स एव
राजा यः प्रजानां परिपालनेन स्वजीवनं यापयति. अन्ये च यथेच्छं
वर्तमानाश्चोरा इव प्रजाभिर्वितीर्णं द्रव्यमुपभुंजाना राजशब्दं दूषयन्ति.
यथा च पारलौकिके परमात्मभक्तिरूपे कर्मणि सावधानता तथैव
लौकिकेऽपि. नीचाः स्वार्थलोलुपा जना राजानं स्तुवन्तः कर्तव्य-
विमुखं विदधति. तत् सावधानेन राज्ञा ते निराकर्तव्याः सज्जनाश्च
संग्रहणीयाः. शिवराज ! किं बहुना 'मुख्यं हरिकथाख्यानं । द्वितीयं
राजकारणं ॥ तृतीयं सावधानेन । सर्वत्र समवर्तनं' इति नितरां
ध्यायन् कर्तव्यं कुरु. भगवान् सीतापतिस्त्वां चिरंजीविनं विधाय
सनातनधर्मं रक्षतु इति.

शिवराजस्तममृतोपमं सदुपदेशमाकर्ण्य सन्तुष्टः सदैव साव-
धानेन वर्तमानः प्रभूतानि परोपकारकार्याण्यकरोत्.

१८ उपसंहारः

१ पश्चाद्राज्यव्यवस्थाविधानं.
२ स्वर्गवासः
३ गुणदोषविवेचनम्.

(१)

एवं सततं विजयमानः श्रीशिवराजः परोपकारकार्याणि प्रतिदिनं कुर्वाणः परमुत्कर्षं प्राप. एकदा स स्वराजधानीमधिवसानो गूढचारमुखेन दिल्लीश्वरः स्वशासनार्थं दक्षिणापथनियुक्ताय प्रान्ताध्यक्षाय प्रभूतं धनं प्रेषयति ' इति शुश्राव. तदानीमेव स्वकीयं प्रजविसादिमण्डलमादाय निर्गतोऽकस्मात् मार्गे एव तान् कोशवाहकानाक्रम्य सर्वान् कोशानात्मसात्कृत्वा महत्या त्वरया राजधानीमायात्. अनेन दुःसहेन परिश्रमेणोरसि संजातवेदनो ज्वरितोऽभूत्. तं च ज्वरमनवतरन्तं वीक्ष्य भीताः सर्वे सेवकाः कुशलान् वैद्यानाहूय चिकित्सामारभन्त. शिवराजश्च स्वसेनापतिं तथा स्वस्य प्रधानामात्यं दिल्लीश्वरराज्ये पराक्रामन्तं मनसिकृत्वा स्वावस्थां गोपयन् शीघ्रमेतौ स्वदेशमागन्तुमाज्ञापयामास.

उपसंहारः

अथ तौ विजयीभूय समागतौ समीक्ष्य सन्तुष्टः शिवराजः
…वसं समयं समुपस्थितं जानन् स्वराज्यव्यवस्थां चिकीर्षुः
…मात्यांस्तथा सेनानायकांश्चाहूय जगाद-सुहृदः ! अयं हि
…ते मे चरमो दृश्यते. अतऊर्ध्वमहं न भविष्यामीति निश्चितकल्पं.
…परलोकस्यावसरः. यो हि आत्मनावश्य परलोको द्रष्टव्य एव.
…मिदं युष्माकं साहाय्येन महत् स्वराज्यं संपादितं तस्य साम्प्रतं
…स्था कर्तव्या. यत्र मम पैतृकं चत्वारिंशत्सहस्रमुद्रायं राज्यमा-
…पादयित्वा कोटिमुद्राय फलमित्यत्र प्रधान जगदीशकृपैव कारणं.
…स्य कृत्स्नस्य राज्यस्य पालक समीचीन पुत्रः कोऽपि नास्तीति
…एवं मे मनः. ज्येष्ठः संभाजिः क्रूर परस्त्रीगामी शीघ्रकोपी राजप-
…नार्हः. कनिष्ठो राजारामश्च समीचीनगुणोऽपि अद्यापि वयसा बालः.
…दिल्लीश्वरस्तु मदीयमन्तकालं काकइव प्रतीक्षमाण. पश्चादग्रागत्य
…कृत्स्नं राज्यमाक्रम्य पुनरपि न आर्याणां कन्यका यवनदासीकरिष्यति.
…ताम्रवं युष्माकं प्रतापतेजसाऽभिभूता विजापुराधीशप्रभृतय पुनरपि
…तं साहाय्यविदधन्ति. तदस्मिन् भाविन्यनर्थे युष्माभिरेकमत्येन
…वर्तनीयं. संभाजिं पूर्ववत् प्रतिबन्धे निधाय राजारामं राज्याधिपं
…विधाय सर्वैरपि स्वकर्माणि कर्तव्यानि. न परस्पर कलह करणीयः.
…अन्तःकलहो न कदापि श्रेयकर. प्रत्युत सर्वनाशकरः. परस्प…
…कलहायमानान्नो वीक्ष्य धूर्ता यवना अत्रागत्य स्वपादान् प्रामारय…
…तपपवशिष्ट मदीयं प्रेम युष्मासु, किंवा युष्मत्पूर्वजानामार्याणां ते…

वा, स्वधर्मभक्त्या वा, स्वभगिनीपातिव्रत्यभङ्गभीत्या, अनाथेषु प्राणरक्षणेच्छया वा, स्त्रीपालनतत्परतया वा, तदा युष्माभिः परस्परं कलहो न कर्तव्यः. संजातस्तु महता प्रयत्नेन परिहरणीय इति वदामि. एका च मेऽन्तिमा प्रार्थना यथा मम प्राणेभ्योऽपि प्रिया मातृभूमिः पुनरपि यवनानां दासी न भविष्यति तथा सर्वथा सन्नद्धैर्वर्तनीयमिति.

ते च जनकस्येव धर्मशीलस्य स्वस्वामिनः शिवराजस्याज्ञां परमात्माज्ञामिव मत्वा निपतद्भिरश्रुभिरगृह्णन्.

(२)

[illegible]

अथ कथमपि स्वशोकं विधूय सर्वेऽपि अमात्याः शिवराजस्य
[illegible]ज्ञां स्मरन्तो दुर्गद्वाराणि पिधाय तां वार्तां बहिर्गन्तुकामानितुं
[illegible]लापयामासुः. ततश्च सर्वैर्धैर्येण समं शिवराजदेहमलंकृत्य
[illegible]विवत् पंचभूतसात्चक्रुः. तदानीं पुतळाबाईनाम शिवराजस्य तृतीया
पत्नी सहगमनं चक्रे. यावकाः ? अस्मिन् जननमरणशालिनि संसारे
के न जाता मृता वा ? परन्तु शिवराजसदृशः पुण्यश्लोको भूपालो
न भावी न भूतः. शिवराजादपि लोकोत्तरशौर्यशालिनो वीरा अजायन्त. शिवराजस्य चापूर्वत्वं न शौर्याधीनं नापि [illegible]
किंतु लोकोत्तरनीतिमत्त्वाधीनं. शिवराजश्च महता प्रयासेन [illegible]
राज्यं लब्ध्वापि समुपस्थितेऽन्तकाले राज्यवियोग[illegible]
[illegible] मोहेन देहं विससर्ज. [illegible]
[illegible]. परदारासु मातृवद्वर्तत. [illegible]
[illegible] न तथा लोकोत्तर[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

...स्य फलेनैव नु लेभे. पौरपदेशानन्तरस्य वधस्तु शिवराजस्य निर्देशेन पितृभिरेव योपयति. ये च परकीयकृपासंपादनार्थं स्वीये-न एव दुह्यन्ति तेऽवश्यमेव दण्डनीया भवन्ति. लुब्धत्वं लुण्ठकत्वं च्यलिप्सन्. परन्तु यदि शिवराजो यवनराज्यदेश निर्लुण्ठ्येतरयवन-राजवल्लिप्सुरभविष्यत्तदा स लुब्धो लुण्ठकश्चाकथयिष्यत्. नैव कदापि शिवराजः स्वसुखार्थं संपादितात् द्रव्यात् कपर्दिकामपि व्ययमकरोत्. प्रत्युत शिवराजः संपादितस्य द्रव्यस्य सदुपयोगार्थं कियान् सावधान आसीदित्यत्रार्थमेकां कथां कथयामि.

एकदा युवराजः सम्भाजिराजो मृगयार्थं गुप्तरीत्या प्रार्थितोऽप्या-किन्तु द्रव्यमपेक्षत. शिवराजश्च परं निरस्तस्वदीयापेक्षा नापूरयत्. अथ स युक्तिप्रमादित कोषागारस्य द्वारमीषदुद्घाट्य तत एव द्रव्यं जहार. इदं निरीक्षकमुखाद्विज्ञाय क्रुद्धः शिवराजस्तमाहूय कशाभिः पमताडयत्. अवदच्च-पुत्रक? इदं च द्रव्यं यथेच्छव्ययार्थं न मातृ-भूम्या मह्यं प्रदत्तं. मातृभूमिरनेन द्रव्येण दीनान् जनान् रक्षितुमि-च्छति, यवनोन्मत्तान् यवनानुन्मूलयितुं तस्मात्त्वया चौरस्य द्रव्यापहारे कशाभिस्ताडनं न्यायविहितं तथैव त्वामहं ताडयामीति.

पाठकाः ? उपरिनिर्दिष्टयाऽनया कथया शिवराजः कथं नि-स्पृह आसीदिति निवेदितमेव. परंसत्यपि यदि तस्य लुण्ठकं वद केवलं लोकद्राघार्थमेव जनान् पीडयता महम्मदगिझनवीप्रभृतीनां

भारतसाधुरत्नमालायाः प्रथमं रत्नम्

श्रीमद्वल्लभाचार्यचरितम्.

लेखकः

हसूरकरोपाव्हः श्रीपादशास्त्री

[न्यायतीर्थः, वेदान्ततीर्थ, मीमांसातीर्थ सांख्यसागरश्च]

अस्मिन् चरित्रे श्रीवल्लभाचार्याणां समग्र चरितं, पु... स्वरूपं, तदीयानि तत्वानि, तत्वज्ञानं, शंकराचार्यादीनां मतापेक्षयैव मतस्यादरणीयत्वे प्रमाणानि सम्यक् निरूपितानि. श्रीमद्... चार्याणां चरितमन्यदेतादृश नैव विद्यते. मूल्यम्... प्रेषणव्ययः पृथक्.

द्वितीयं रत्नम्–

श्रीरामदासस्वामिचरितम्.

अचिरादेव प्रकटीभविष्यति

मॅनेजर पी. वी. गंगे,

३० इमलीबाजार, इंदौर, सिटी C. I.